CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीरमित्रोदय

...त्रोदयः

3xk20,1
s

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

September. Hari 1908.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 129.

वीरमित्रोदयः ।

महामहोपाध्यायश्रीमित्रमिश्रविरचितः ।

पर्वतीयनित्यानन्दशर्मणा संशोधितः ।

VÎRAMITRODAYA,

BY

MAHÂMAHOPÂDHYÂYA PANDIT MITRA MÎSRA,

EDITED BY

Parvatîya Nityânanda Sarmâ.

FASCICULUS V.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES:

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHÂRÂMA MUKUNDAJÎ, BOMBAY.

Printed by Harî Dâs Gupta, Proprietor,

AT THE VIDYÂ-VILÂSA PRESS.

BENARES.

Price Rupee One.

Registered According to Act XXV. of 1867.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽलङ्कृतभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—१२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वोच्चांशगैः शुभैर्लग्नैर्दृष्टे लग्ने यदा तदा ।
लग्नलग्नांशसंभूताः सर्वे दोषा लयं ययुः ॥
एकोऽपि सौम्यखचरः स्वाधिमित्रगृहस्थितः ।
आलोकयति चेल्लग्नं सर्वदोषविनाशकृत् ॥
मित्राधिमित्रस्वक्षेत्रसंस्थे सति शुभग्रहे ।
वीक्षमाणे यदा लग्नं तदा दोषा लयं ययुः ॥
ये पापखेटप्रभवाश्च दोषा
विलग्नलग्नांशकसंभवा ये ।
केन्द्रे गुरुस्तान्विमलीकरोति
फलं यथाऽम्भः कतकद्रुमस्य ॥ इति ।

अथ बटुमातृरजोनिर्णयः ॥

तत्र वृद्धगर्गः,
विवाहव्रतचूडासु माता यदि रजस्वला ।
तस्याः शुद्धेः परं कार्यं माङ्गल्यं मनुरब्रवीत् ॥
विवाहे विधवा नारी जडत्वं व्रतबन्धने ।
चौले चैव शिशोर्मृत्युस्तस्मादेतत्त्रयं त्यजेत् ॥ इति ।
रजोनुऽवृत्तौ बृहस्पतिरपि,
वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने ।
चूडायां च शिशोर्मृत्युर्विघ्नो यात्राप्रवेशयोः ॥ इति ।
तच्च मातरि गर्भिण्यामपि न कार्यम् ।
तथा च स्मृत्यन्तरं,
सूनोर्मातरि गर्भिण्यां मौञ्जीचूडे न कारयेत् ।
गते तु पञ्चमे मासे गर्भादीनां मृतिर्भवेत् ॥ इति ।
अत्र मौञ्जीचूडयोः साहित्यं न विवक्षितम् ।
सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते ॥

इतिनारदवचनविरोधात् । किं तु प्रत्येकमेव निषेधः । साहित्यं त्वेकक्रियान्वयित्वेन धवखादिरौ छिन्धीतिवत्, नैककालान्वयित्वेन ।

अथ मण्डनोत्तरमुण्डननिर्णयः ॥

तत्र कात्यायनः,

पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः ।
मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मङ्गलम् ॥
चौलं मुण्डनमेवोक्तं वर्जयेद्वरणात्परम् ।
मौञ्जी चोभयतः कार्या यतो मौञ्जी न मुण्डनम् ॥ इति ।

उभयतः विवाहात्प्रागूर्ध्वं चेत्यर्थः । अत्र मौञ्जीमात्रस्य चोभयतो विधानाद्विवाहात्परं चौलसहितमौञ्ज्यनुष्ठानं न सिध्यति । चौलनिषेधस्यात्राप्यव्याहतत्वात् ।

विशेषान्तरं प्रागेवोक्तमिति नेहोच्यते ॥

अथ सोदरोपनयननिर्णयः ।

तत्राश्वलायनः,

एकमातृप्रसूते वा कन्ये वा पुत्रकौ तयोः ।
सहोद्वाहं न कुर्वीत तथैव व्रतबन्धनम् ॥

ज्योतिर्निबन्धे,

एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः ।
न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥ इति ।

अस्यापवादो भट्टकारिकायाम्,

एकस्मिन्वत्सरे चैव वासरे मण्डपे तथा ।
कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ इति ।

मङ्गलं सर्वोऽपि संस्कारः। विशेषान्तरं विवाहप्रकरणे वक्ष्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोपनेयनिर्णयः।

तत्र ब्राह्मणक्षत्रियविशामुपनयनं "वसन्ते ब्राह्मणमुपनयीत" "गर्भाष्टमेऽष्टमेवाऽब्दे" इत्यादिश्रुतिस्मृतिभ्यामेव सिद्धम्। शूद्राणां तु तन्न भवत्येव। अशूद्राणामदुष्टकर्मणामुपनयनमिति आपस्तम्बेन शूद्रपर्युदासात्। शूद्र एकजातिरिति गौतमने तस्यैकजातित्वाभिधानाच्च। तच्च पित्रादिना पुत्रादीनां कार्यमिति वक्ष्यते। ते च पुत्रादयो द्विविधाः। औरसाः क्षेत्रजादयश्च। तांश्चाह

याज्ञवल्क्यः,

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः।
कानीनः कन्यकाजातो मातामहसुतो मतः॥
अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः।
दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत्॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं सुतः।
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः।
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥ इति।

औरसा अपि द्विविधाः सजातीया विजातीयाश्च। तत्र सजातीयानामुपनयनं द्विजत्वेन प्राप्तम्। विजातीया अपि द्विविधाः। अनुलोमजाः प्रातिलोमजाश्च। तत्रानुलोमजानामुपनयनमाह

* मनुः,

स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः। इति।

---

* स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः। इति।
अस्यार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वजातिजा सवर्णा अनन्तरा ऽनुकल्पत्वेनाम्नाता किंचिदपकर्षवती वा। ब्राह्मणस्य क्षत्रिया वैश्या च, क्षत्रियस्य वैश्या च। एतासु जाताः षट्। शूद्रापेक्षया ऽनन्तरवर्णस्याप्रसिद्धत्वात् स्वपदार्थस्त्रैवर्णिक एव। तेन शूद्रायां शूद्रजातस्य स्वजातिजाजन्यत्वेनाभिधानं न प्रसज्यते। न च

ब्राह्मणक्षत्रियविशां मातुरग्रे विजननम्।

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितास्तु ये।
सदृशानेव तानाहुर्मातृदोषविगर्हितान्॥

इत्यनेनानुलोमजानां यद् द्विजसादृश्यमुक्तं तत्र निमित्ताभिधानायेदमारभ्यते। स्वजातिजेति। स्वजातिजाः सवर्णास्ताभ्योऽनन्तराः पश्चादनुकल्पत्वेनाम्नाताः ब्राह्मणस्य क्षत्रियावैश्याशूद्राः क्षत्रियस्य वैश्याशूद्रे वैश्यस्य शूद्रा, तासु ये जाता मूर्धावसिक्ताम्बष्ठनिषादमाहिष्योग्रकरणा द्विजातीनां षट् सुताः, ते द्विजधर्मिणः। द्विजानां धर्मो द्विजधर्मः सोऽस्ति एषां ते द्विजधर्मिणः द्विजात्युक्तोपनयनादिधर्मार्हा इत्यर्थः। क्षत्रियादिजाता इति वक्तव्ये यत् स्वजातिजानन्तरजा इत्युक्तं, तत् क्षत्रियादिपूर्व्यादिसुतानां द्विजधर्मत्वव्युदासाय। तत्परिणयनिषेधेन तदुत्पन्नानां विगर्हितत्वात्। ततश्च सवर्णादिक्रमोढासवर्णासुतानामेव द्विजधर्मित्वमिति सिध्यति। स्वजातय इत्यनेनैव सिद्धौ यत् जेत्युपादानं तत पत्नीत्वोत्पत्तिं गमयति। ततश्च सवर्णस्वैरिणीपरिग्रहानन्तरोढाक्षत्रियाद्युत्पन्नानामपि न द्विजधर्मत्वमिति सिध्यति। अनन्तरास्वपि पत्नीत्वमनुसन्धेयम्। तथैवोपक्रमात्। षट्संख्योपादानं द्विजातिस्त्र्यपत्यानामेव द्विजधर्मत्वं माभूत्किन्तु शूद्रापत्यानामपि तदास्त्वित्येवमर्थम्। सुत इति पुंस्त्वग्रहणं क्लीबादिव्युदासाय। उपनयनादिविशेषपरिहारेण द्विजधर्मिण इति सामान्योपादानं स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सुमन्तुवचनेन सवर्णापुत्राणामुपनयनस्य प्राप्तत्वात् तदुपनयनविधानं व्यर्थमिति वाच्यम् । तथा सति षट्पदस्थाने त्रय इत्यभिधाने सवर्णापुत्राणां व्यवच्छेदलाभे सुमन्तुवचनविरोधापत्तेः । ऋष्यन्तरोक्तस्य मनुना विधाने वैयर्थ्यप्रसङ्गाच्च ।

अन्ये तु ब्राह्मणक्षत्रियवैश्यैः शूद्रायां जातांस्त्रीनादाय षट्त्वमुपनेयानां वर्णयन्ति । तदयुक्तम् । प्रतिलोमा धर्महीनाः शूद्रायां चेति गौतमवाक्येन शूद्रायां द्विजोत्पन्नस्य द्विजधर्महीनत्वबोधनात् । अत एव

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
तानन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥

कल.द्विजधर्मप्राप्त्यर्थम् । यदा तु स्वजातिजाः सवर्णोत्पन्ना ये त्रयः सवर्णाः पुत्रास्तेभ्योऽनन्तरमसवर्णासु जाता मूर्धावसिक्तादयः षडनुलोमजाः सुतास्ते द्विजधर्मिणः. द्विजात्युक्तधर्मार्हा इति व्याख्यायते तदा क्रमोढास्वपि प्रथमोत्पन्नानां क्षत्रियादिसुतानां द्विजधर्मित्वं न स्यात् । विवाहर्तुगमनक्रमयोः शास्त्रीयत्वेऽपि पुत्रोत्पत्तिक्रमस्याशास्त्रीयत्वात् । यत्तु कौश्चिन्निषादोग्रकरणपरिहारेण ब्राह्मणक्षत्रियवैश्यैः स्वजातिजैः सहानन्तरजानां मूर्धावसिक्ताम्बष्ठमाहिष्याणां त्रयाणामेव षट्त्वमभिप्रेत्य द्विजधर्मत्वं व्याख्यातं, तन्न सुन्दरम् । ब्राह्मक्षत्रियविशां मातुरग्रे विजननमित्याद्युपदेशत एव द्विजधर्मत्वसिद्धौ द्विजधर्मातिदेशानर्थक्यात् । न चानन्तरजानां द्विजतुल्यताभिधानेन द्विजधर्मप्राप्त्यर्थः सिद्धस्यैवानुवादोऽयमिति युक्तम् । तेनैवार्थसिद्धौ षट् सुता द्विजधर्मिण इति पुनर्विध्यारम्भानर्थक्यात् । उभयस्वीकारे तु एकस्यैव द्विजधर्मिपदस्य मूर्धावसिक्तादित्रये द्विजधर्मविधायकत्वं ब्राह्मणादित्रये तदनुवादकत्वमिति विध्यनुवादविरोधाच्च । किं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वचने "मातृनाम्नो मातृतो जातिकल्पना" इति वचने च मातृवर्णस्यातिदेश उपपद्यते। नं च

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितास्तु ये।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥

इति वचने द्विजसादृश्यं द्विजानन्तरायां शूद्रायां समुत्पन्ने बोधितमिति मातृनामवर्णातिदेशस्तदीयवृत्तिप्राप्त्यर्थ एवेति वाच्यम् । यतो विगर्हिताभिधानस्वरसेन तस्मिन्नर्धश्लोके मातुरुपस्थितत्वेन च मातृसादृश्यमेव वाक्यस्यार्थो न तु द्विजसादृश्यं शूद्रायाम्। न च त्रैवर्णिकोत्पन्नस्य द्विजधर्मत्वाभावे शूद्रधर्मस्य चानभिधाने उभयतोभ्रष्टत्वप्रसङ्गः मातृनामवर्णातिदेशसादृश्याभिधानत एव शूद्रधर्मत्वप्राप्तेः ।

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन्षडेतेऽपसदाः स्मृताः ॥

इत्युपक्रमे यत्संख्येयविषया षट्संख्या निर्णीता,

स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः ।

इत्युपसंहारेऽपि तत्संख्येयविषयैव सोपसंहर्तव्येति युक्तम् । अन्यथोपक्रमविरोधापत्तेः । अथ

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥

इत्यनेन शूद्रायां द्विजात्युत्पन्नानामपि शूद्रनामकत्वाभिधानान्न द्विजधर्मत्वं युक्तमिति वाच्यम्। सत्यमस्ति शूद्रनामकत्वं तथाऽपि न तेषां द्विजधर्मतापवादकम् । वचनद्वयस्याप्येककर्तृकस्मृतित्वेन अनुलोमजमात्रविषयत्वेन च तुल्यबलत्वात् । किन्तु विकल्पापादकमेव । न चासावपि वस्तुतः सम्भवति । मातृजातीयदण्डाजिनाद्यङ्गप्रापकात्तत्तज्जातीयवृत्त्यादिदृष्टप्रापकाद्वा मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ऋषयो वै सरस्वत्यां सत्रमासत कवषमैलूषं सोमादृन यन् दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्ये ऽदीक्षिष्टेति तं बहिर्धन्वोदवहन् अत्रैनं पिपासा हन्तु सरस्वत्या उदकं मा पादिति स बहिर्धन्वोदूल्हः* पिपासया वित्त एतदपोनप्त्रीयमपश्यत्म देवत्रा ब्रह्मणे गातुरेत्विति तेनापां प्रियं धामोपागच्छत्तमापोऽनूदायंस्तं सरस्वती समन्तं पर्यधावत्तस्माद्धाप्येतर्हिं परिसारकमित्याचक्षते, यदेतं सरस्वती समन्तं परिससार । ते वा ऋषयोऽब्रुवन्विदुर्वा इमं देवा उपेमं ह्वयामहइति तथेति तमुपाह्वयन्त तमुपहूयैतदपोनप्त्रीयमकुर्वत प्र देवत्रा ब्रह्मणे गातुरेत्विति । तेनापां प्रियं धामोपागच्छन्नुपदेवानामुपापां प्रियं धाम-

---

तृसनामकत्वविधौ प्रधानोपनयनाद्यदृष्टसंस्कारप्रापकस्य द्विजधर्मत्वविधेर्बलवत्त्वेन विपरीतबाध्यबाधकभावसंभवात् । किं च निषादोग्रकरणानां द्विजधर्मतापरिहारे विध्यभावो वा निमित्तमाहोस्वित्तन्निषेधसद्भावो वेति पृच्छामः । न तावदाद्यः । "षट् सुता द्विजधर्मिणः" "सदृशानेव तानाहुः" "आत्मा वै पुत्रनामासि" "आत्मा हि जज्ञे आत्मनः" "स एवायं विरूढः सन्नक्षेत्रेणोपलभ्यते" "तत्रात्मा जायते स्वयम्" "येषामुभयतो नाब्राह्मण्यं पितृत इत्येके" "पुत्रप्रजनने मातुः प्राधान्यम् †"। किं च स्वजातिजानन्तरजा इत्यत्रानन्तरशब्दोऽव्यवधानवचनः आहोस्वित्पश्चाद्भाववचनः । किं प्राप्तम्, अव्यवधानवचन इति । कुतः,

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितास्तु ये ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम् ॥

---

* उदूढ इत्यर्थः ।

† अत्र ग्रन्थस्त्रुटितो भाति । पुस्तकान्तराभावात्तथैव स्थापितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गच्छत्युपदेवानां जयति परमं लोकं य एवं वेदेत्यैतरेयब्राह्मणे दासीपुत्रस्य सत्रानुष्ठानश्रवणात्तस्यापि उपनयनं युज्यते। सरस्वतीतीरे सत्रमासीनैः ऋषिभिरिलूषपुत्रः कवषनामा ऋषिः दासीपुत्रः कितवो ऽब्राह्मणोऽस्माकं मध्ये कथं दीक्षियष्यतीति मत्या मरुदेशे निपातितः। अत्रैनं पिपासा हन्तु सरस्वत्युदकमप्ययं मा पादिति। तत्रायं पिपासाखिन्नोऽब्दैवतं प्रदेवत्रेति पञ्चदशर्चं सूक्तं सस्मार। तत्प्रयोगप्रभावेन सरस्वत्येव स्वदेशमपहाय तं प्रत्यधावत्। ततस्ते तस्य देवतानुग्रहं वेदप्रभावं च ज्ञात्वा सत्रे तं समाहूय तत्सूक्तप्रयोगेण सरस्वतीमविन्दन्निति हि श्रुत्यर्थ इति चेत् मैवम्। दासीपुत्रः कितवो ऽब्राह्मण इत्याक्षेपमात्रं न तु वस्तुगत्यैव तन्मातुर्दासीत्वमिति भाष्यव्याख्यानात्। न च महाभारते दीर्घतमउपाख्याने

तस्यां काक्षीवदादीन्स शूद्रयोनावृषिस्तदा।

इत्युपक्रमे अनन्तरशब्दस्यैकान्तद्वरयन्तरशब्दसमभिव्याहारेणाव्यवहितपरत्वेनाभ्युपगमात्। तथा

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते॥
यथा त्रयाणां वर्णानां द्वयोरात्मा ऽस्य जायते।
आनन्तर्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमः॥

इति मध्येऽव्यवहितपरत्वेन परामर्शाच्चान्तेऽव्यवहितपरत्वस्यैवौचित्यात्। ततश्च ब्राह्मणस्य क्षत्रिया क्षत्रियस्य वैश्या वैश्यस्य शूद्रा चानन्तरा भवतीति तत्पुत्राणां द्विजत्वाभिधाने वैश्याशूद्रोत्पन्नस्य करणस्याप्युपनयनं सिध्येत्। अथानन्तरोत्पन्नस्यापि करणस्य शूद्रापसततया प्रद्वेषेण सागरस्तर्हि षट्संख्या बाध्येत। अथ तदबाधाय ब्राह्मणावैश्योत्पन्नस्याम्बष्ठस्य ग्रहणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनयामास धर्मात्मा पुत्रानेकादशैव तु ।
काक्षीवदादीन्पुत्रांस्तान् दृष्ट्वा सर्वानधीयतः ॥
उवाच तमृषिं राजा ममेमइति भारत ।

इति स्मरणात् शूद्रस्यापि वेदाध्ययनाङ्गभूतमुपनयनमिति वाच्यम् । अध्ययनमात्रस्मरणेऽपि वेदाध्ययनास्मरणात् ।

न च रामायणे
न द्विजातिरहं शङ्कां ब्रह्मवध्याकृतां त्यज ।

तर्ह्यानन्तर्यबाधस्तस्यैकान्तरोत्पन्नत्वादित्युभयतःपाशा रज्जुः । अथ क्वचिदव्यवधानं क्वचिच्चैकान्तरत्वं चानन्तरशब्दार्थस्तर्हि द्व्यन्तरत्वमप्यनन्तरशब्दार्थोऽस्तु । त्रितयसाधारणस्य पश्चाद्भावस्यैवैकस्य लाघवेन प्रवृत्तिनिमित्तत्वौचित्यात् । तथा च प्रक्रान्तानां षण्णामप्यनुलोमजानां द्विजधर्मत्वाभिधानं षण्णामपि प्रतिलोमजानां शूद्रधर्मत्वाभिधानमाश्रयेणैव घटते । अन्यथा निषादोग्रकरणाः द्विजशूद्रधर्मत्वाभावादुभयतो भ्रष्टाः स्युः, क्वापि स्मृतौ पृथग्धर्माभिधानाभावात् । अथ

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥

इत्यत्र मातृनामतत्र्व्यपदेशाच्छूद्रधर्मप्राप्तिरिति वाच्यम् । तर्हि

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितास्तु ये ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥

इत्यत्र द्विजसादृश्यनिर्देशेन द्विजधर्मत्वमेव कुतो नेष्यते । नामातिदेशाद्वचनातिदेशस्य बलवत्त्वात् । तस्मात्सिद्धं षण्णामप्यनुलोमजानां द्विजत्वमिति । अत एवैतरेयकब्राह्मणे निषादस्योपनयनलिङ्गं सत्रानुष्ठानं दृश्यते । तद्यथा,

५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणेन त्वहं जातः शूद्रायां वसता वने ॥

इत्युक्तवतो मुनिपुत्रस्य दशरथहतस्य पित्रा

कस्य चापररात्रेऽहं स्वाध्यायं कुर्वतो वने ।
श्रोष्यामि सुचिरं शब्दं पुण्यं शास्त्रमधीयतः ॥

इति विलापे शूद्रापुत्रस्य वेदाध्ययनस्मरणात्तस्योपनयनमिति वाच्यम् । कुर्वत इत्यनेनान्वयाय स्वाध्यायपदस्य शोभनाध्ययनपरत्वेन वेदाध्ययनानवबोधात् ।नन्वादिपर्वणि

ऋषयो वै सरस्वत्यां सत्रमासत ते कवषमैलूषं सोमादनयन् दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्ये ऽदीक्षिष्टेति तं बहिर्धन्वोदवहन्नत्रैनं पिपासा हन्तु सरस्वत्या उदकं मा पादिति स बहिर्धन्वोदूल्हः पिपासया वित्त एतदपोनप्त्रीयमपश्यत्प्रदेवत्रा ब्रह्मणे गातुरेत्विति तेनापां प्रियं धामोपागच्छत्तमापोऽनूदायं·स्तं सरस्वती समन्तं पर्यधावत्तस्माद्धाप्येतर्हि परिसारकमित्याचक्षते, यदेनं सवस्वती समन्तं परिससार।ते वा ऋषयोऽब्रुवन्विदुर्वा इमन्देवा उपेमं ह्वयामहइति तथेति तमुपाह्वयन्त तमुपहूयैतदपोनप्त्रीयमकुर्वत प्रदेवत्रा ब्रह्मणे गातुरेत्विति ततोऽपां प्रियं धामोपागच्छन्नुपदेवानामुपापां प्रियं धाम गच्छत्युपदेवानां जयति परमं लोकं य एवं वेदेति ।

अत्रायं वाक्यार्थः । सरस्वतीतीरे सत्रमासीनैः ऋषिभिरिलूषपुत्रः कवषनामा ऋषिर्दासीपुत्रः कितवोऽब्राह्मणोऽस्माकं मध्ये कथं दीक्षिष्यति इति मत्वा मरुदेशे नीत्वा पातितः अत्रैनं पिपासा हन्तु सरस्वत्युदकमप्ययम्मा पादिति । तत्रायं पिपासाखिन्नोऽब्दैवतं प्रदेवत्रेति पञ्चदशर्चं सूक्तं सस्मार तत्प्रयोगप्रभावेण सरस्वत्येव स्वदेशमपहाय तं प्रत्यधावत् । ततस्ते तस्य देवताऽनुग्रहं वेदप्रभावं च ज्ञात्वा सत्रे तं समाहूय तत्सूक्तप्रयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धृतराष्ट्रश्च पाण्डुश्च विदुरश्च महामतिः।
जन्मप्रभृति भीष्मेण पुत्रवत्परिपालिताः॥
संस्कारैः संस्कृतास्ते तु व्रताध्ययनसंयुताः।
इतिहासपुराणेषु नानाशिक्षासु बोधिताः॥
श्रमव्यायामकुशलाः समपद्यन्त यौवनम्।
धनुर्वेदे च वेदे च गदायुद्धेऽसिचर्मणि॥
तथैव गजशिक्षायां नीतिशास्त्रे च पारगाः।
वेदवेदाङ्गतत्त्वज्ञास्सर्वत्र कृतनिश्चयाः॥

इति विदुरस्य वेदवेदाङ्गाध्ययनस्मरणात् शूद्रापुत्रस्याप्युपनयनमिति चेत् मैवम्। धृतराष्ट्रादिनिष्ठबहुत्वसामानाधिकरण्यमात्रेण वेदादेरध्ययनं यथायोग्यमुन्नेयमिति विदुरस्य वेदाध्य-

---

गेण सरस्वतीमाविन्दान्निति विदुर्वा इमन्देवा इत्यनेनोपनयनकालीनदेवतासंप्रदानकबटुपरिदानमुक्तं भवति। तेन हि ते तं जानतेऽयमस्मदीय इति। तस्मात्सिद्धं निषादस्योपनयनमिति। रामायणे शरहतस्य ऋषिपुत्रस्य दशरथं प्रति वाक्यमपि,

न द्विजातिरहं शङ्कां ब्रह्मवध्याकृतां त्यज।
ब्राह्मणेन त्वहं जातः शूद्रायां वसता वने॥
तत्पितुर्वाक्यमपि,
कस्य चापररात्रेऽहं स्वाध्यायं कुर्वतो वने।
श्रोष्यामि सुचिरं शब्दं पुण्यं शास्त्रमधीयतः॥ इति।
महाभारतेऽपि दीर्घतमउपाख्याने,
तस्यां काक्षीवदादीन्स शूद्रयोनावृषिस्तदा।
जनयामास धर्मात्मा पुत्रानेकादशैव तु॥
काक्षीवदादीन्पुत्रांस्तान्दृष्ट्वा सर्वानधीयतः।
उवाच तमृषिं राजा ममेमइति भारत॥ इति।
तत्रैव धृतराष्ट्राद्युत्पत्तावपि,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यनाबाधनात् । अत एव विदुरेण श्रुसर्थस्य धृतराष्ट्रं प्रत्युपदेशो न कृत इति भारतेऽभिहितम् ।

वस्तुतस्तु

जातो नार्यामनार्यायामार्यादार्यो भवेद् गुणैः ।
आर्यात् जातोऽप्यनार्यायामनार्य इति निश्चयः ॥
तावुभावप्यसंस्कार्यौ विधिधर्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः ॥

इति मनुवचनं शूद्रापुत्रस्योपनयनं निषेधति इति तद्विपरीतत्वाद्विध्यश्रवणाच्च रामायणाद्युक्तलिङ्गं न शूद्रापुत्रोपनयनं

धृतराष्ट्रश्च पाण्डुश्च विदुरश्च महामतिः ।
जन्मप्रभृति भीष्मेण पुत्रवत्परिपालिताः ॥
संस्कारैः संस्कृतास्ते तु व्रताध्ययनसंयुताः ।
श्रमव्यायामकुशलाः समपद्यन्त यौवनम् ॥
धनुर्वेदे च वेदे च गदायुद्धेऽसिचर्मणि ।
तथैव गजशिक्षायां नीतिशास्त्रे च पारगाः ॥
इतिहासपुराणेषु नानाशिक्षासु बोधिताः ।
वेदवेदाङ्गतत्त्वज्ञाः सर्वत्र कृतनिश्चयाः ॥ इति ।

अस्त्वेवं निषादादीनामुपनयनप्राप्तिः । दण्डाजिनादिप्राप्तिस्तु कुतः स्यात् । तन्मातॄणां शूद्राणां तदभावात् । मातृसनामतया च मातृजातीयतत्प्राप्तेरेव सिद्धान्तितत्वात् । इति चेत् । रथकारस्य वा तत्प्राप्तिः कुतस्त्येति ब्रूहि । तन्मातुः करण्या अपि तदभावात् । अथ तत्र पितुर्माहिष्यस्यैव दण्डादिना तदुपनयनं तर्हि प्रकृतेऽपि तदभ्युपगम्यताम् । युक्तं चैतत् । द्विजोत्पन्नानामनुलोमजानां द्विजसादृश्याभिधानस्य समानमितरच्छ्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधयितुं प्रभवति। श्वजाघनीभक्षणादिवत् तद्बोधितवेदाध्ययनाद्युपपत्तेरिति रहस्यम् *।

ये त्वनुलोमजा अप्यनूढोत्पन्नाः कुण्डगोलकास्तेषामुपनयनं न सर्वस्मृतिसम्मतं वर्णजातिलक्षणाभावात्।

तथाचादिपुराणे,

सवर्णासु सवर्णैस्तु ये जायन्ते परैरपि।
अवरोढकसंज्ञास्ते व्रतसंस्कारवर्जिताः॥

परैः स्वपत्यतिरिक्तैः। अवरोढक इति कुण्डगोलकयोस्साधारणी संज्ञा।

देवलोऽपि,

द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते।
अवरोढ इति ज्ञेयः शूद्रधर्मा स जातितः।

शूद्रधर्मा अनुपनेय इत्यर्थः। तथा

व्रतहीनास्त्वसंस्कार्याः सवर्णास्वपि ये सुताः।
उत्पादिताः सवर्णेन व्रात्या इति बहिः कृताः॥

अपिशब्दादसवर्णानुलोमासु जातानां सुतरामसंस्कार्यत्वमुक्तं भवति।

अन्ये तु तयोरप्युपनयनमिच्छन्ति।

तथाच ब्रह्मपुराणम्,

एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डलगोकौ। इति।

नेनेतिवद्वाचनिकातिदेशतया मातृनामातिदेशापेक्षया प्रबलत्वात्। तस्मात्सिद्धं द्विजानुलोमजानां द्विजत्वमिति *।

---

* मनुः, स्वजातिजानन्तरजा इत्यारभ्य वेदाध्ययनाद्युपपत्तेरिति रहस्यमित्यन्तस्य स्थाने, मनुः, स्वजातिजानन्तरजाः इत्यादिः तस्मात् सिद्धं द्विजानुलोमजानां द्विजत्वमितीत्यन्तः पाठः पुस्तकान्तरे उपलभ्यते। स च उपर्युल्लिखितपाठेन विरुद्धः प्रतिभाति। एनयोर्युक्तायुक्तत्वं सुधीभिर्विचारणीयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं मूकाद्युपनयनविधिनेऽप्यर्थः ।

तत्कर्तव्यमप्युक्तं तत्रैव,

कुण्डो वा गोलको विप्रः संध्योपासनमात्रवित् ।
स्नानभोजनसंध्यासु देवेषु स पठेच्चरेत् ॥
एकान्ते कुटपे भुक्त्वा सदृशैस्सह सङ्गतः । इति ।

संध्या त्रिकालजा । उपासनं गृह्याग्नौ सायंप्रातर्होमः । मात्रशब्देन गायत्रीपुरश्चरणदर्शपूर्णमासस्थालीपाकादिनिवृत्तिः । विच्छब्देन तावन्मात्रोपयुक्तमन्त्राध्ययनमभ्यनुज्ञायते । नैतावदेव किंत्वन्यदपीत्याह । स्नानेति । स्नानं प्रातर्मध्याह्नयोः । भोजनं सायंप्रातः । अत्र संध्याशब्देन सायंप्रातर्विहितो वैश्वदेवो लक्ष्यते । भोजनसन्निधानात् । असंस्कृतान्नभोजननिषेधाच्च । अत्र पाठक्रमो न विवक्षितः । आह्निकक्रमप्रापकसामान्यप्रमाणसद्भावात् । देवो देवपूजा । एतेषु अधिकरणसप्तम्या निमित्तसप्तम्या वा कर्त्तव्येषु तत्तदुपयुक्तान्मन्त्रान्पठेत् । चरेदाचारं शौचाचमनादिकम् । परिगणनं चेदम् इतरद्विजधर्मपरिसंख्यार्थम् । श्राद्धं तु सामान्यधर्मत्वाद्भविष्यति । तदेवं कुण्डगोलकयोर्विधिनिषेधाभ्यामुपनयने विकल्पमेके मन्यन्ते । अपरे तु क्षेत्रजगूढजकानीनपौनर्भवसहोढानां कुण्डगोलकत्वेऽपि नियोगाद्यभ्यनुज्ञानदर्शनादुपनयनविधिं तद्विषयमेवाहुः । यत्युत्पन्नस्य सत्यपि कुण्डगोलकत्वे सगोत्रोढोत्पन्नस्य च नोपनयनम् । चण्डालत्वस्मरणात् ।

तथाच बौधायनः,

आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रजः ।
सगोत्रोढासुतश्चैव चण्डालास्त्रय ईरिताः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथानुलोमजानां संकराणां रथकारनिदर्शनेनोपनयनं व्याख्येयमिति मिताक्षरोक्तिः।

तथाच शङ्खः, क्षत्रियवैश्यानुलोमानन्तरजोत्पन्नो रथकारः तस्य चेज्यादानोपनयनसंस्कारक्रिया अश्वप्रतिष्ठा रथसूत्रवास्तुविद्या ऽध्ययनवर्त्तिता चेति।

अस्यार्थः। क्षत्रियस्यानुलोमोऽनन्तरो वैश्यः। वैश्यस्यानुलोमोऽनन्तरः शूद्रः। ताभ्यां तयोरुत्पादिते माहिष्यकरण्यौ। तस्यां तस्माज्जातो रथकारः।

माहिष्येण करण्यां तु रथकारः प्रजायते।

इति स्मरणात्। तस्य इज्या यागो ज्योतिष्टोमादिः। दानं मन्त्रसाध्यं तुलापुरुषादि महादानम्। उपनयनमुक्तलक्षणम्। संस्कारा उपनयनोत्तरभाविनः जीवतो मृतस्य च। पूर्वसंस्काराणां शूद्रादिसाधारणत्वात्। क्रियाः काम्यनैमित्तिकाः। अश्वप्रतिष्ठा शालिहोत्रादिरथसूत्रं रथनिर्माणयोजनचालनादि। वास्तुविद्या गृहप्रासादादिनिर्माणम्। अध्ययनं वेदादेः। एतद्वर्त्ती एतदनुष्ठातेत्यर्थः। नन्वेवं रथकारस्योपनयनाध्ययनेज्यादिसम्भवे रथकाराधिकरणसिद्धान्तविरोधः। तत्र हि रथकारशब्दस्य रूढ्या उपनयनादिरहितजातिविशेषपरतया तदाधानस्यापूर्वतायाः सिद्धान्तितत्वादिति चेत्। नायं दोषः। तस्य प्रकृतरथकारातिरिक्तस्य ऋभुसुधन्वापरपर्यायस्योपनयनादिराहितस्य व्रात्यापसस्य तत्रोदाहरणत्वात्। तथाच

तन्त्ररत्नोदाहृतं स्मृतिवचनं,

व्रात्यात्तु जायते वैश्यात्सुधन्वाचार्य एव सः।

भरुषश्च विजन्मा च मैत्रः सात्वत एवच॥ इति।

अथ मूकाद्युपनयनं ब्रह्मपुराणे,

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्माच्च षण्ढबधिरकुब्जवामनपङ्गुषु ॥
जडगद्गदरोगार्त्तशुष्काङ्गविकलाङ्गिषु ।
मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ॥
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् ।
मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते ॥
कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः ।
तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा ॥
संस्कारमन्त्रहोमादीन्करोत्याचार्य एव तु ।
उपनेयांश्च विधिवदाचार्यः स्वसमीपतः ॥
आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत् ।
कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत् ॥
एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ । इति ।

अस्यार्थः । अत्र ऊढात्वविशेषणमनपेक्ष्यैव केवलब्राह्मणब्राह्मणीजन्यत्वेन गोलकादिसाधारणं ब्राह्मण्यमभिप्रेत्येदमुच्यते ब्राह्मण्यामिति । तेनेदं गौणं ब्राह्मण्यं तन्निमित्तक एवायमुपनयने गुणविकारः । कुब्जवामनादिषु सत्यपि मुख्ये ब्राह्मण्ये कुब्जत्वादिनिमित्तक एवास्योपदेशः । तेन गुणविकारे निमित्तद्वयं सिध्यति । गौणं ब्राह्मण्यं कुब्जत्वादिकं चेति । अन्यथा कुब्जादीनामत्र परिगणनमनर्थकं स्यात् । षण्ढादयोऽत्र जात्यैवात्वधेयाः । चिकित्सनीयेषु पुनर्यथावदुपनयनं कार्यं न गुणविकारः । मत्तः मद्यादिना । उन्मत्तो ग्रहावेशादिना । शयनस्थ उत्थानाशक्तः । निरिन्द्रियः षडिन्द्रियशून्यः । ध्वस्तपुंस्त्वो दोषविशेषेणाप्रत्यानेयपुंस्त्वः । यथोचितं यस्य यदङ्गोपसंहारसामर्थ्यं नास्ति तस्य तदङ्गपरिहारेण कर्त्तव्यमित्यर्थः । मत्तोन्मत्तयोर्मतान्तरमाह । मत्तोन्मत्तौ न संस्कार्याविति । तत्र हेतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माह । कर्मस्वनधिकारादिति । तदपत्यसंस्कारे हेतुमाह । पातित्यं नास्ति चैतयोरिति । ततश्च व्यतिरेकमुखेन पतितापत्यं न संस्कार्यमित्युक्तं भवति । पतितोत्पन्नः पतितो भवति अन्यत्र स्त्रिया इति वसिष्ठस्मरणात् । तदपत्यं तु संस्कार्यमित्यत्र तुशब्देन विवक्षितं विधिं विच्छिद्य प्राकृत एव विधिरनूद्यते संस्कार्यपदेन । अन्यथा अपरे त्वाहुरन्यथेति अन्यथापदेन विवाक्षितविधेः पक्षान्तरत्वाभिधानं नोपपद्येत । ततश्च मत्तोन्मत्तापत्यस्य प्राकृतविधिगुणविकारौ वैकल्पिकौ भवतः । तमेव गुणविकारं दर्शयति । संस्कारेति । बटुपठनीयानां दण्डाजिनोपवीतादिग्रहणसंस्कारमन्त्राणामाचार्यं प्रत्येव पाठो विधीयते । तथा होमः समिदाधानं तन्मन्त्रपाठश्च । नाचार्यपठनीयानाम् । न वा तत्कर्तृकस्य प्रधानहोमस्य, विधिप्राप्तत्वात् । बटूपगमनपरिहारेणाचार्यस्य स्वसमीपेऽग्निसमीपे वा पङ्ग्वादिमाणवकानयनं विधीयते । प्राकृतात् गायत्र्युपदेशात् बटुं स्पृष्ट्वा गायत्रीजपो वैकल्पिको विधीयते । तस्य च श्रवणोच्चारणसमर्थान् प्रत्युपदेशः । मूकबधिरादीन् प्रति स्पृष्ट्वा जप इति व्यवस्था । एवमुपनयनविधिमुक्त्वा विवाहविधिमाह । कन्यास्वीकरणादिति । अनुमन्त्रयेत गाण्यभिमृशेद्पाणि कन्यां चेत्याश्वलायनोक्तयोः कन्यास्पर्शानुमन्त्रणयोरुभयसमर्थं प्रत्युभयम्, अन्यतरसमर्थं प्रत्यन्यतरादिति । एतदुभयातिरिक्तं सर्वमाचार्येण करणीयमिति ।

बौधायनोपि,

अथ षण्ढबधिरमूकानां संस्कारं व्याख्यास्याम ऋतुर्यथाकामी स्यात्पुण्ये नक्षत्रे ब्राह्मणान् भोजयित्वा ऽऽशिषो वाचयित्वा केशानोप्य स्नातं शुचिवाससं बद्धशिखं यज्ञोपवीतिनमप आचाम्य देवयजनमुदानयत्यथ देवयजनोल्लेखनप्रभृत्याऽग्निमुखा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रकृत्वा याज्ञिकीं समिधमाज्येनाङ्क्त्वा तूष्णीमभ्याधापयति तूष्णीमश्मानमास्थापयति यथालाभं तूष्णीं वासः परिधापयति तूष्णीं मेखलां मन्त्रवद्ग्रन्थिं करोति तूष्णीमजिनं प्रतिमुञ्चति तूष्णीं दण्डं प्रयच्छति याज्ञिकस्य वृक्षस्य नाम पृच्छत्यथैनं दक्षिणं हस्तं गृह्णाति यस्मिन् भूतं च भव्यं चेत्यथैनं देवताभ्यः परिददाति देवेभ्यस्त्वेत्यथैनमुपनयति । देवस्य त्वेति सर्वं नामग्रहणवर्जमाचार्य एव पक्वाज्जुहोति तत्सवितुर्वरेण्यमित्यथाज्याहुतीरुपजुहोति क्षेत्रियै त्वा निर्ऋत्यै त्वेति षड्भिर्व्याहृतीभिरथाग्रेणाग्निं याज्ञिकस्य वृक्षस्य पर्णेषु हुतशेषं निदधातीति तत्पुरस्ताद्व्याख्यातम् । अथ पक्वादुपादाय प्राश्नाति तूष्णीं सर्वान्मन्त्रानाचार्य एव जपेदित्येके । अन्धजडक्लीबव्यसनिव्याधितोन्मत्तहीनाधिकाङ्गानामामयाव्यपस्मारिश्वित्रिकुष्ठिजङ्गरोगिणश्चैतेन व्याख्याता इत्येके । सद्यो मधुपर्कं ददाति तिसृषु व्युष्टासु मधुपर्कवदापृता तूष्णीमायुर्दा अग्ने हविषो जुषाण इति पिता वा भ्राता वाऽऽत्मजमारोपयेदित्येके । ऋतोर्यथाकामित्वेन वसन्ताद्यनियमोऽभिहितः । उपनयति गायत्रीसंबद्धं करोति उपदेशेन तं स्पृष्ट्वा जपेत वा ।

अथ स्त्र्युपनयनम् ।

तत्र हारीतः,

द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्येति । सद्योवधूनां तूपस्थिते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्य इति ।

यमोऽपि,

पुराकल्पे कुमारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः।
स्वगृहे चैव कन्याया भैक्षचर्या विधीयते॥
वर्जयेदजिनं चीरं जटाधारणमेवच। इति।

पुराकल्पेऽर्थवादविशेषं। तत्रार्थवादिकविधेस्सार्वकालिकत्वे शिष्टस्मृतिविरोधदर्शनात्कल्पान्तरइति स्मृतिचन्द्रिकाकारः। पित्रादिरेवैनामध्यापयेन्न पर इत्यन्वयः।

मनुरपि,

प्राङ्नाभिवर्धनात्पुंस इत्युपक्रम्य नामकरणनिष्क्रमणान्नप्राशनचूडोपनयनकेशान्तान्पुरुषसंस्कारान्विधायान्ते पूर्वोक्तसंस्कारेतिकर्त्तव्यतां स्त्रीष्वतिदिशति।

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥ इति।

अत्रेयमिति सर्वनाम्ना बुद्धिस्थपरामर्शात्सप्तानां च संस्काराणां बुद्धिस्थतया उपनयनस्यापि तदन्तर्गतत्वेनातिदेशात्स्त्रीणामप्यमन्त्रकमुपनयनं सिध्यति। ये तु चूडान्तानामेवेदमा परामर्शो नोपनयनकेशान्तयोरिति मन्यन्ते तेषामसंबन्धिव्यवधानेन विच्छिन्नबुद्धीनां परामर्शं वदतां कथमिव लज्जा नाननमानमयति। अथ "तूष्णीमेताः क्रियाः स्त्रीणाम्" इतियाज्ञवल्क्यैकवाक्यतया चूडान्तानामेव परामर्शो नोपनयनादीनामिति वाच्यम्। तर्हि यमहारीतवाक्यैकवाक्यतया उपनयनपरामर्शोऽपि कथं नाङ्गीक्रियतइति। अथ

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया॥

इत्यग्रेतनवाक्ये विवाहस्योपनयनस्थानापत्तिविधानान्यथानुपपत्त्या इदमः संकोच इति न वाच्यम्। तस्य स्मृत्यन्तराभिहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोपनयनाभावपक्षे विवाहस्य तत्स्थानापत्तिविधायकत्वेनापि चरितार्थत्वात् । तस्मान्मनुवाक्ये नेदमः संकोच इति ।

किंचाश्वलायनेनापि मुखमग्रे ब्राह्मणोऽनुलिम्पेतेति समावर्त्तनीयमनुलेपनं प्रस्तुत्योपस्थं स्त्रासनेन स्त्रीणामनुलेपनं विदधता तासामप्युपनयनमुक्तं भवति । उपनयनपूर्वकत्वात्समावर्त्तनस्य । यत्तु सार्वत्रिकोऽयं स्त्रीणामनुलेपनविधिः न समावर्त्तनीयः उपनयनाभावेन समावर्त्तनासंभवादिति व्याख्यानं, तदसत् । उक्तरीत्योपनयनसद्भावेन प्राग्रजसः समावर्त्तनमितिहारीतोक्त्या च प्राग्रजसः समावर्त्तनसंभवे तदङ्गत्वपरिहारेणोत्कर्षस्यान्याय्यत्वात् । प्रकरणे च संभवन् अपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति इति न्यायात् । अत एव संन्यासब्रह्मजिज्ञासादिकमप्युपनीतानामेव स्त्रीणां घटते । आश्रमसमुच्चयाविकल्पयोरुपनयनपूर्वकत्वात् । तदयं निर्गलितोऽर्थः । ब्रह्मवादिनीनां गर्भाष्टमादौ मन्त्रवत्तूष्णीं चोपनयनं ततो वेदाध्ययनं प्राग्रजोदर्शनात्समावर्त्तनं प्रागेव रजोदर्शनाद्विवाहश्चेति । सद्योवधूनां तूक्तविवाहकालएवोपनयनं सद्य एव समावर्त्तनं सद्य एव विवाह इति । पुराकल्पइति वचनान्नास्मिन् कल्पइति गम्यते । अत एव

मनुः,

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥

इत्यादिना विवाहस्योपनयनस्थानापत्तिमाह । वैदिको वेदग्रहणार्थः संस्कारः उपनयनं स स्त्रीणां वैवाहिको विधिः विवाहजन्यः संस्कारः स्मृतः पूर्वैरिति, मेधातिथिपाठार्थः । मिताक्षरादिपाठस्तु औपनायनिकः स्मृतइति । तत्र औपनायनिकं उपनयनकार्यकारी । ततश्च यथा पुरुषस्योपनयनादिस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीणां विवाहादिर्विधिर्निषधाधिकार इत्यर्थः ।

अथानुपनेयाः ।

तत्र गौतमः, शूद्र एकजातिरिति । एकजातिः एकजन्मा न द्विजन्मा । उपनयनाभावादित्यर्थः । आपस्तम्बोऽपि, अशूद्राणामदुष्टकर्मणामुपनयनमिति शूद्रव्यतिरिक्तानामिति वदन् शूद्रस्य तन्नेत्याह । प्रतिलोमजानामपि तन्नास्तीत्याह मनुः,

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ।

इति । शूद्रसाधर्म्येणैकजातित्वमुक्तं भवति । अपध्वंसजाः व्यभिचारोत्पन्नाः । प्रतिलोमजेष्विति वक्तव्ये यद्व्यभिचारजत्वेनाभिधानं तत्सवर्णानुलोमजयोरपि व्यभिचारोत्पन्नयोरनुपनेयत्वाभिधानाय । तदेतदुपपादितमधस्तात् । तत्र सूतोपनयनं शास्त्रान्तरेऽङ्गीकृतमिति हरदत्तः । तच्छास्त्रान्तरं,

यथा त्रयाणां वर्णानां द्वयोरात्माऽस्य जायते ।
आनन्तर्य्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमः ॥

इति मनुवचने मेधातिथिव्याख्या । सा यथा । अस्य ब्राह्मणस्य स्वयोनौ द्वयोः आनन्तर्यात्क्षत्रियवैश्ययोश्च एवं त्रयाणां वर्णानां यथा आत्मा द्विजो जायते तथा बाह्येषु प्रतिलोमजेष्वपि वैश्यक्षत्रियाभ्यां क्षत्रियाब्राह्मण्योरात्मा द्विजो जायतइति क्रमो वेदितव्यः । ततश्च सूतवैदेहकयोरप्युपनयनं भवतीति । तां च कुल्लूकभट्टनारायणसर्वज्ञौ नाभ्युपगच्छतः । प्रतिलोमास्तु धर्महीना इतिगौतमवचनविरोधात् ।

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ।

इति मूलवचनविरोधाच्च । न चोक्तवाक्येनात्र सर्वपदसंकोचः, तस्यार्थान्तरत्वात् । तथा हि । यथा त्रयाणां वर्णानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणक्षत्रियवैश्यानां मध्येऽस्य ब्राह्मणस्य स्वयोन्यां ब्राह्मण्याम् आनन्तर्यात् क्षत्रियायां चेत्येवं द्वयोरात्मा ब्राह्मण एव भवति। यथा ऽगस्त्यस्य क्षत्रियायां लोपामुद्रायां दृढच्युतादयो ब्राह्मणा एव। तथा ब्राह्येषु सूतादिप्रतिलोमेष्वस्य सुतस्य स्वयोन्यां सूतायामानन्तर्याद्ब्राह्मण्यां च सूत एवेति वचनार्थो युक्तः। यत्तु

मृषा ब्राह्मणकन्यायां विवाहेषु समन्वयात्।
जातः सूतोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः॥
वेदानर्हस्तथा चैषां धर्माणामनुबोधकः।

इत्युशनसो वाक्यं, तस्यायमर्थः। ब्राह्मणकन्यायां मृषा विधिहीनेषु विवाहेषु ऊढायां समन्वयात्सजातीयाज्जातः अत्र शास्त्रे प्रतिलोमविधिः प्रतिलोमधर्मा द्विजो निर्दिष्टः स च वेदानर्हः तथाप्येषां स्मार्त्तानां धर्माणाम् अनु पश्चाद् ब्राह्मणं पुरस्कृत्य ब्राह्मणाभावे वा बोधकः उपदेष्टा भवति। ततश्च विधिश्च विधिविकलविवाहोढब्राह्मणीजातस्य ब्राह्मणस्यैव सूतसंज्ञस्य प्रतिलोमधर्मस्येदमुपनयनं न सूतजातेरिति न विरोधः।

शङ्खलिखितावपि, नोन्मत्तमूकान्संस्कुर्यादिति। प्राकृतेन विधिनेति व्याख्येयम्। अन्यथा ब्रह्मपुराणाद्युक्तोपनयनविधिविरोधापत्तेः।

विष्णुरपि। नापरीक्षितं याजयेन्नाध्यापयेन्नोपनयेदिति। अपरीक्षितं कुलवृत्तादिभिः।

तदेतत्स्पष्टीकृतं जाबालगौतमसंवादव्याजेन श्रुतावेव,
सत्यकामो वै जाबालो हारिद्रुमतं गौतममियायेत्यादिना।

अथोपनेतृनिर्णयः।

तत्र वृद्धगर्गः,

पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपानयेऽधिकारी स्यात्पूर्वाभावे परः परः ॥ इति ।
भ्राताऽत्र पितुर्भ्रातेति व्याख्येयम् ।
पितैवोपनयेत्पुत्रं तदभावे पितुः पिता ।
तदभावे पितुर्भ्राता तदभावे तु सोदरः॥

इति पितामहस्मरणात् । ज्ञातयः सपिण्डाः । गोत्रजाग्रजा गोत्रजेषु सपिण्डातिरिक्तेषु अग्रजा माणवकापेक्षया वृद्धाः । यद्यप्यग्रजपदं गोत्रजपदेन समस्तं तथापि बुद्ध्या विभज्य सपिण्डेष्वपि संबन्धनीयम् । अन्यथोपनेयकनिष्ठानामपि तदधिकारापातात् । दारकाचार्यत्वस्योपपातकत्वाच्च । अत्र केचिदाचार्यसमीपनयनमेवोपनयनम् इत्यभिप्रेत्य पितैवोपनयेदित्यादिवाक्यानि पितैवाचार्यसमीपं नयेदित्यर्थपरतया व्याचक्षते। सत्यपि पित्रादावुपनेतरि होमगायत्र्युपदेशादिकर्त्ता ऽन्य एवाचार्योऽन्वेष्टव्यः ।

आस्तिको वेदनिरतः शुचिश्चाचार्य उच्यते।

इत्यादिवाक्येष्वाचार्यस्य नित्यवच्छ्रवणात् । पितुरेवाचार्यत्वे आचार्यलक्षणाचार्यशौचाचार्यपत्न्यभिगमनप्रायश्चित्ताभिधानाद्यानर्थक्यापत्तेः । पितृलक्षणाद्यभिधानेनैव गतार्थत्वात् । पितृकुलावस्थितस्य ब्रह्मचारिणः आचार्यकुलप्रत्यावृत्तिरूपसमावर्त्तनासंभवापत्तेश्च । तस्मात्पित्रतिरिक्तः आचार्यः कर्तव्यइति । तन्न सुन्दरम् । बटोराचार्येण गायत्रीसंबन्धकरणस्यैवोपनयनपदार्थत्वेन व्याख्यातत्वात् । तत्र च पित्राचार्ययोः समुदितयोः कर्तृत्वासंभवेन नित्यवच्छ्रुतस्याप्याचार्यस्य विकल्पेनानुकल्पत्वेन वाऽन्वयस्यावश्यमभ्युपेयत्वात् । लक्षणाद्यभिधानं त्वनुकल्पतया प्राप्तस्याप्यपेक्षितमेव।समावर्त्तनं तु नाचार्यकुलान्निवृत्तिरेव किंतु ब्रह्मचारिव्रतसमापनमिति न क्वापि विरोधः । तस्मात्पित्राद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावे आचार्यः कर्त्तव्य इति स्थितम् ।

तत्राचार्यलक्षणमाह श्रुतिः।तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वानितिहि ब्राह्मणम् तस्मिन्नभिजनविद्यासमुदितं समाहितं संस्कर्त्तारमीप्सेदिति। अस्यार्थः।यं माणवकमविद्वान्वेदादिविद्याशून्य आचार्य उपनयते स माणवकः तमसः अज्ञानात्तमोऽज्ञानान्तरं प्रविशति। न केवलमुपनेयस्यैवायं दोषोऽपितूपनेतुरपीत्याह । यश्चाविद्वानिति । यश्चाविद्वानाचार्योऽन्यमुपनयते सोऽपि तमसस्तमः प्रविशति अस्मिन्नर्थे वक्ष्यमाणं ब्राह्मणम् । अभिजनविद्यासमुदितं संस्कर्त्तारमीप्सेदिति । अभिजनो बन्धुसमुदायः, विद्याः वेदाद्याः चतुर्दश। ताभ्यामुत्कृष्टम् । समाहितम् अविक्षिप्तचित्तम् । एतादृशमुपनेतारमुपेयादित्यर्थः ।

व्यासोऽपि,

वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम् ।
स्वशाखाज्ञमनालस्यं विप्रं कर्त्तारमीप्सितम् ॥ इति ।

श्रोत्रियलक्षणमुक्तं ब्रह्मपुराणे,

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया वापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥ इति ।

कर्त्तारम्, उपनयनस्येति शेषः ।

यमोऽपि,

सत्यवाक् धृतिमान् दक्षः सर्वभूतदयापरः ।
आस्तिको वेदनिरतः शुचिराचार्य उच्यते ॥
वेदाध्ययनसंपन्नो वृत्तिमान् विजितेन्द्रियः ।
दक्षोत्साही यथावृत्तजीवनेहस्तु वृत्तिमान् ॥

शौनकोऽपि,

कुमारस्योपनयनं श्रुताभिजनवृत्तवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तपसा धूतनिःशेषपाप्मा कुर्याद् द्विजोत्तमः ॥ इति ।

हारीतोऽपि ,

न याजयेद्वृत्तिहीनं वृणुयाच्च न तं गुरुम् ।

नहि मज्ज्ञा करौ दिग्धौ रुधिरेण विशुध्यतः॥ इति ॥

मज्ज्ञोति मज्जन्शब्दस्तृतीयान्तः । उक्तविशेषणानां त्रैवर्णिकसाधारण्येऽपि विशेष्योऽत्र ब्राह्मण एवावधेयः । विप्रं कर्तारमीप्सितमिति व्यासवाक्ये विप्रपदोपादानात् । तस्यैवाध्यापनाधिकाराच्च । तेन त्रयाणामपि वर्णानां पित्राद्यभावे विप्र एवोपनेता न क्षत्रियादिरिति सिध्यति ।

अथ बटूपनेत्रोरधिकारसिद्ध्यर्थं प्रायश्चित्तम् ।

तत्र वृद्धविष्णुः,

कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च बटुश्चरेत् । इति ।

आचार्यस्य विशेषमाह स एव,

सावित्रीमभ्यसेदग्निपवित्राणि च संस्मरेत् ।

सहस्रं द्वादशावृत्तं सावित्रीं प्रजपेद्बुधः ॥

स्वाधिकारार्थमेवास्याः प्रदानार्थं हि तत्स्मृतम् । इति ।

अग्निपवित्राणि अग्निः शुचिः व्रततम इत्यादीनि । प्रजपेदिति नित्याभ्यासमेवानूद्य संख्याविशेषमाह । सहस्रमिति । तत्प्रयोजनमाह । स्वाधिकारार्थमिति । अस्याः प्रदानार्थं यः स्वाधिकारस्तदर्थमित्यन्वयः ।

अथ सम्भारसम्भरणम् ।

तत्र शौनकः,

पूर्वेद्युरेव सकलान्सम्भारांश्च यथोचितान् ।

संभृत्याभ्युदयश्राद्धमपि कुर्याद्यथाविधि ॥

अत्रापिशब्दात्स्वस्तिवाचनग्रहमखमण्डपदेवतास्थापनादि गृह्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रादौ परिधानार्थं कल्पयेन्नववस्त्रकम् ।
शिरोऽवगुण्ठनं चैव नवमन्यत्प्रकल्पयेत् ॥
शिरोऽवगुण्ठनं प्रावरणवासः ।
यथोक्तमजिनं वापि कल्पयेदवगुण्ठनम् ।
उपवीतं च संपाद्य तथा कृष्णमृगाजिनम् ॥
यथोक्तमेखलां दण्डं यथोक्तं च प्रकल्पयेत् ।
एवं संभृत्य संभारान् पूर्वेद्युश्च यथोचितान् ॥ इति ।
आश्वलायनोऽपि,
क्रमशश्चाजिनादीनि भिक्षापात्रं जलस्य च ।
कौपीनाच्छादनार्थाय मौञ्जीं कार्पासिकीं द्विजः ॥
संभरेत् त्रिवृतां तावद्वाससी वा ऽहते पुनः । इति ।

अत्र कौपीनबन्धसूत्रोपदेशाद् ब्रह्मचारिणः कौपीनधारणमप्युक्तं भवति । तदेतन्मेधाजनने स्पष्टयति स्वयमेवाश्वलायनः,

वाससी ते स्वगुरवे मेधाजनकर्मणि ।
दद्यात्तावत्प्रभृत्येव कौपीनेन प्रवर्तयेत् ॥
तावत्प्रभृति कौपीनेनैवेत्यन्वयः ।
प्राग्द्वादशाब्दाद् व्रतिनो वासो न बिभृयुरित्यपि ।
केचिदाहुर्द्विजाः केचिदाप्यष्टाब्दाच्च सूरयः ॥
कौपीनमात्रा वर्त्तन्ते तथा ऽन्ये ब्रह्मचारिणः । इति ।

अत्र मात्रशब्देन बहिर्वासोव्यावृत्तिः । ततश्च उपनयनादिनमारभ्य यावन्मेधाजननं कौपीनं बहिर्वास * आच्छादनवासः कृष्णाजिनं वा, मेधाजननमारभ्य कौपीनम् आच्छादनवासः कृष्णाजिनं वेत्यर्थः संपद्यते ।

वाससि विशेषमाहाश्वलायनः,
अहतेन वाससा संवीतमिति ।

---

* आच्छादनकृष्णाजिनयोर्विकल्पो ज्ञेयः । एवमुत्तरत्रापि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहतलक्षणमाह प्रचेताः,

ईषद्धौतं नवश्वेतं सदशं यन्न धारितम्।

अहतं तद्विजानीयात्सर्वकर्मसु पावनम्॥ इति।

वस्त्रेष्वेव विशेषमाहाश्वलायनः,

यदि वासांसि वसीरन् रक्तानि वसीरन्काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्य इति।

अस्यार्थः। व्यवहितकल्पनया वाक्यद्वयं व्याख्येयमिति हरदत्तः। वासांसि वसीरन्नित्येको विधिः। यदि रक्तानि वसीरन्काषायं ब्राह्मण इत्यादिरपरः। अत्र प्रथमवाक्येन वासांसि वसीरन्परिदध्यादिति परिधानं विधीयते। अपेक्षितत्वात्। द्वितीयेन तु द्रव्यान्तरापादितवर्णान्तराणि वासांसि यदि वसीरन् तदा काषायं ब्राह्मण इत्यादि प्रतिवर्णं परिधानविशेषो विधीयते। शुक्लस्य वर्णान्तरापादनस्यैव रागशब्दार्थत्वात्। यदाह काशिकाकारः। शुक्लस्य वर्णान्तरापादनम् इह रजेरर्थ इति।

आपस्तम्बः,

वासः शाणक्षौमाविकानि, काषायं चैके वस्त्रमुपदिशन्ति ब्राह्मणस्य, माञ्जिष्ठं राजन्यस्य, हारिद्रं वैश्यस्येति।

पारस्करः,

वासाꣳसि शाणक्षौमाविकानीति।

मनुः,

वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च। इति।

वसिष्ठः,

शुक्लमहतं वासो ब्राह्मणस्य, कार्पासं माञ्जिष्ठं क्षौमं क्षत्रियस्य, पीतं कौशेयं वैश्यस्य, सर्वेषां वा तान्तवमरक्तमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौतमः,

वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासं वा विकृतं काषायमप्येके ब्राह्मणस्य माञ्जिष्ठं हारिद्रमितरयोः ।

शङ्खः,

क्षौमदुकूलसौत्राणि वासांसि त्रयाणां वर्णानाम् ।

यमः,

क्षौमकार्पासकुतपचर्मवल्कलकम्बलाः ।
सर्वं तु धारयेच्छुक्लं वासस्तत्पारिधानिकम् ॥

पैठीनसिरपि,

कमण्डलु यज्ञोपवीतं काषायं वस्त्रमिति समानानि ।

अथाजिनानि ।

तत्राश्वलायनः,

ऐणेयेन वाऽजिनेन ब्राह्मणं, रौरवेण क्षत्रियम्, आजेन वैश्यामिति ।

अत्र वाशब्दग्रहणाद्वासोऽजिनयोर्विकल्पः । उभयोरपि प्रावरणार्थत्वात् । एतावत्तु सावधारणं यद्यजिनं प्रावरणं तदा ब्राह्मणक्षत्रियविशां यथाक्रममैणेयरौरवाजान्यजिनानि भवन्तीत्यर्थः । एणी बिन्दुरहिता मृगी तत्संबन्ध्यैणेयम् । एणीशब्दात् ढक्प्रत्ययः । रुरुः बिन्दुमान्मृगः । अजः छागः ।

आपस्तम्बः । हारिणमैणेयं वा कृष्णं ब्राह्मणस्य कृष्णं चेदनुपस्तीर्यासीताधःशायी स्यात्, रौरवं राजन्यस्य, बस्ताजिनं वैश्यस्य, आविकं सार्ववार्णिकं कम्बलश्च । ब्रह्मवृद्धिमिच्छन्नजिनान्येव वसीत क्षत्रवृद्धिमिच्छन्वस्त्राण्येवोभयवृद्धिमिच्छन्नुभयमिति हि ब्राह्मणमजिनं चैवोत्तरं धारयेत् । ऐणेयम् एणीसमुद्भवम् । एणी गौरमृगी । यदा हारिणं तदा कृष्ण तच्च नोपस्तीर्यासीत शयीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा । बस्तः छागः। आविकं मेषचर्म । सार्ववर्णिकं सर्वद्विजातिसंबद्धम् । उत्तरम् उत्तरीयम् ।

पारस्करः,

ऐणमजिनमुत्तरीयं ब्राह्मणस्य, रौरवं राजन्यस्य, आजं गव्यं वा वैश्यस्य, सर्वेषां वा गव्यमसति प्रधानत्वात् ।

अत्रैणमुत्तरीयमिति वचनात् प्रागुक्तानि शाणादीन्युत्तरीयाणीति गम्यते । असति यथोक्ताजिनासंभवे गव्यं प्रधानत्वात् प्रशस्तत्वादित्यर्थः ।

हिरण्यकेशी,

कृष्णाजिनं ब्राह्मणस्य, रौरवं राजन्यस्य, बस्ताजिनं वैश्यस्येति ।

मनुः,

कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः । इति ।

शङ्खोऽपि,

कृष्णरुरुबस्ताजिनान्युत्तरीयाणीति ।

वसिष्ठोऽपि,

कृष्णाजिनमुत्तरीयं ब्राह्मणस्य, रौरवं राजन्यस्य, आव्यं बस्ताजिनं वा वैश्यस्येति ।

विष्णुः,

मार्गवैयाघ्रबास्तानि चर्माणि ।

पैठीनसिः,

कृष्णरुरुपृषतानामजिनानीति ।

गौतमः,

कृष्णरुरुबस्ताजिनानीति ।

यमः,

कृष्णाजिनं ब्राह्मणस्य रौरवं क्षत्रियस्य तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बस्ताजिनं तु वैश्यस्य सर्वेषां रौरवाजिनम्॥ इति।

बृहस्पतिरपि,

ब्राह्मणस्याजिनं कार्ष्णं रौरवं क्षत्रियस्य च।

वास्तं वैश्यस्य वासांसि शाणक्षौमाविकानि च॥ इति।

अस्माच्च वासोविकल्पकात्प्रावरणाजिनादतिरिक्तमन्तर्वासः-स्थानीयमजिनान्तरं धारणीयमित्याह

शौनकः,

निक्षिप्य ब्रह्मसूत्रं तु त्रितयाधः प्रसार्य च।

वामांसे स्थापयेच्चैतत्तथा कृष्णमृगाजिनम्॥ इति।

तत्परिमाणमाह शाकलः,

अखण्डं वा त्रिखण्डं वा ऽष्टाचत्वारिंशदङ्गुलम्।

चतुरङ्गुलविस्तीर्णं धारयेदजिनं सदा॥

खण्डत्रयपरिमाणमुक्तं स्मृत्यन्तरे,

अङ्गुलं तु बर्हिर्लोम यद्वा स्याच्चतुरङ्गुलम्।

अजिनं धारयेद्विप्रश्चतुर्विंशाष्टषोडशैः॥ इति।

चतुर्विंशाङ्गुल एकः खण्डः। अष्टाङ्गुलो द्वितीयः। षोडशाङ्गुलस्तृतीयः। त्रिभिः स्यूतैरष्टाचत्वारिंशदङ्गुलं परिमण्डलं संपद्यते।

अथोपवीतम्।

तत्र मनुः,

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत।

शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रजम्॥

त्रिवृन्नवसूत्रकं, नव वै त्रिवृदिति श्रुतेः।

विष्णुरपि,

कार्पासशाणाविकान्युपवीतानि वासांसि चेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पैठीनसिरपि,

कार्पासं चोपवीतं सर्वेषामिति ।

अथोपवीतानुकल्पाः ।

बौधायनः,

कौशं सौत्रं त्रिस्त्रिवृद्यज्ञोपवीतमानाभेः । कौशं कृमिकोशोद्भवं पट्टसूत्रमयमिति यावदिति कल्पतरुः । वस्तुतस्तु कौशं कुशपत्रनिर्मितम् ।

तथाच गोभिलः,

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशरज्जुं वेति । सौत्रं कार्पासम् ।

देवलः,

कार्पासक्षौमगोवालशणवल्कतृणोद्भवम् ।

सदा संभवतो धार्यमुपवीतं द्विजातिभिः ॥ इति ।

क्षुमा अतसी तत्संबन्धि । वल्कलं तरुत्वक् । तृणोद्भवं कुशादिनिर्मितम् ।

ऋष्यशृङ्गः,

अपित्वा वाससा यज्ञोपवीतार्थं कुर्यात् तदभावे त्रिवृता सूत्रेणेति ।

निगमपरिशिष्टेऽपि,

वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण कुशमुञ्जबालत्वक्शणरज्जुमेव वेति ।

आदित्यपुराणे,

क्षौमजं वाऽथ कार्पासं शणसूत्रमथापिवा ।

दध्याद्यज्ञोपवितं यो न तं हिंसन्ति वायसाः ॥

वायसा राक्षसाः । यद्यप्येषु वाक्येष्वसंभवयथासंभववाशब्दाः श्रूयन्ते तथाप्येषां कल्पानां मुख्यासंभवविषयत्वमेव द्रष्टव्यं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तुल्यबलत्वम्। कार्पासादीनामुत्पत्तिवाक्यशिष्टत्वेन बलवत्त्वात्।

अथोपवीतलक्षणम्।

तत्र भृगुकात्यायनौ,

त्रिवृदर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम्।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरुच्यते॥

संग्रहेऽपि,

ऊर्ध्ववृत्तमधोवृत्तं पुनरूर्ध्ववृतं तथा।
एतद्यज्ञोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते॥ इति।

गृह्यपरिशिष्टेऽपि,

उपवीतमयुग्मशरं विषमतन्तुकं त्रिवृद्यज्ञोपवीतमिति।

एकं सूत्रमयुग्मशरं त्रिगुणीकृत्य वलितं पुनस्त्रिवृत् क्रियते त्रिगुणीकृत्य वल्यते तन्नवतन्तुकमुपवीतं भवति। तद्विषमन्ततुकं त्रिगुणीकृतम् एकेन ग्रन्थिना बद्धं सद्यज्ञोपवीतमित्युच्यते।

तथाच देवलः,

यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम्।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा॥ इति

अत्र तन्तोर्द्वैगुण्यं त्रैगुण्यासम्भवे द्रष्टव्यम्। ततश्च द्विगुणस्यैव त्रैगुण्ये षट्तन्तुकतैव संपद्यते।

अत एव पैठीनसिः,

कार्पासमुपवीतं षट्तन्तुकं त्रिवृतं ब्राह्मणस्य क्षौमं राजन्यस्याविकं वैश्यस्येति।

द्विगुणं सूत्रं त्रिवृत्कृतं षट्तन्तुकं भवतीत्यर्थः। तदूर्ध्ववृतं कार्यम्।

तथाच मार्कण्डेयपुराणे दत्तात्रेयः,

अधोवृतैस्त्रिभिः सूत्रैः पुनश्चोर्ध्ववृतैस्त्रिवृत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊर्ध्ववृतस्य लक्षणमाह

संग्रहकारः,

करेण दक्षिणेनोर्ध्वगतेन त्रिगुणीकृतम् ।

वलितं मानवैः सूत्रं शास्त्रे ऊर्ध्ववृतं स्मृतम् ॥

ऊर्ध्वं गतेन ऊर्ध्ववलितेन दक्षिणेन करेण यद्वलितं तदूर्ध्ववृतमित्यर्थः ।

अथोपवीतनिर्माणप्रकारः ।

तत्र देवलः,

कार्पासकं समादध्याच्छुचिक्षेत्रे विशोधितम् ।

त्रिवृतं तु तथा कार्यं ब्राह्मण्या सूत्रकं कृतम् ॥

ब्राह्मण्यत्र सधवेति व्याख्येयम् । विधवानिर्मितस्य निषिद्धत्वात् ।

तथा च स्कान्दे,

विधवारचितं सूत्रमनध्याये कृतं च यत् ।

विच्छिन्नं चाप्यधो यातं भुक्तनिर्मितमुत्सृजेत् ॥ इति ।

इदं च सूत्रान्तरसम्भवे द्रष्टव्यम् । असम्भवे तु तस्यापि ग्राह्यत्वात् ।

तदुक्तं स्मृतिसारे,

छेदे विनाशे वा स्नातः कन्यया निर्मितं शुभम् ।

विधवाद्याभिरथवा सूत्रं गृह्णीत वै शुचिः ॥ इति ।

छेदे विनाशे, यज्ञोपवीतस्येति शेषः ।

ग्रामान्निष्क्रम्य संख्याय षण्णवत्यङ्गुलीषु तत् ।

तावत्त्रिगुणितं सूत्रं प्रक्षाल्याब्लिङ्गकैस्त्रिभिः ॥

अब्लिङ्गकैः आपोहिष्ठादिभिः ।

देवागारेऽथवा गोष्ठे नद्यां वा ऽन्यत्र वा शुचौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु तद्भवेत् ॥
विल्वाश्वत्थादियज्ञार्थवृक्षस्यान्यतमस्य तु ।
बध्नीयात्तत्सजीवं तु पितृभ्यो नम इत्यथ ॥
अप्रमदावेक्षितव्यं स्यात्पितॄणां तृप्तिदं हि तत् ।
त्रिस्ताडयेत्करतलं देवानां तृप्तिदं हितत् ॥
सव्ये मृदं गृहीत्वाऽस्मिन् स्थापयेद् भूरिति ब्रुवन् ।
पत्रं पुष्पं फलं वापि व्याहृतीभिः प्रतिक्षिपेत् ॥
अभिमन्त्र्याथ भूरग्निश्चेतिवृत्तत्रयं त्रिभिः ।

तत्र मन्त्राः । भूरग्नये च पृथिव्यै च महते च स्वाहा । भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । सुवरादित्याय दिवे च महते च स्वाहेति ।

हरिब्रह्मेश्वरेभ्यश्च प्रणम्य च दधात्यथ ।
यज्ञोपवीतमित्यादिमन्त्रः स्यादवधारणे ॥
यज्ञोपवीतमित्यादिव्याहृत्या वापि धारयेत् ।
अथ प्रतितन्तु देवताः ।

तत्र देवलः,

ॐकारः प्रथमस्तन्तुर्द्वितीयोऽग्निस्तथैवच ।
तृतीयो भगदैवत्यश्चतुर्थः सोमदैवतः ॥
पञ्चमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः ।
सप्तमो वसुदैवत्यो धर्मश्चाष्टम एव च ।
नवमः सर्वदैवत्य इत्येता नवदेवताः ॥ इति ।

एतदज्ञाने निन्दार्थवादमाह

पितामहः,

य एवं नाभिजानाति ब्रह्मसूत्रसमुद्भवम् ।
वेदोक्तं निष्फलं तस्य स्नानदानजपादिकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणो यो न जानाति ब्रह्मसूत्रस्य संस्थितिम्।
मोहात्मा वहेत भारं पशुर्गौरिव सर्वदा॥ इति।

अथ यज्ञोपवीतनिरुक्तिः।

स्मृतिसारे,
यज्ञार्थः परमात्मा य उच्यते चैव होतृभिः।
उपवीतं ततोऽस्येदं तत्स्याद्यज्ञोपवीतकम्॥ इति॥

अथ यज्ञोपवीतोत्पत्तिः।

तत्राश्वलायनः,
ज्ञातृविज्ञेययोरैक्यमविजानन् द्विजोत्तमः।
न सृजेदात्मनः सूत्रं ब्राह्मं ब्रह्मविनिर्मितम्॥
सिसृक्षुरेक एवाग्रे समासीनः शिवः स्वयम्।
दृष्ट्वा गुणमयीं मायां सूत्ररूपामिवाकरोत्॥
तया तदात्मकं विष्णुं सृष्ट्वा पालं दिवौकसाम्।
स्वयं ब्रह्माऽभवद्रुद्रो रुद्रश्चास्य जयाय सः॥
ज्ञानात्मकेन हरिणा ब्रह्मात्मनि शिवेऽव्यये।
तत्सूत्रमुपवीतत्वाद्ब्रह्मसूत्रमिति स्मृतम्॥
यज्ञेन चोपवीतत्वाद्यज्ञसूत्रं विदुर्बुधाः।
तदाज्ञया वृतत्वाच्च ब्रह्मणा ब्रह्मसूत्रकम्॥
तावल्लोकास्त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः।
शिवसृष्टास्त्रयो वर्णास्त्रिवृत्सूत्रं समाश्रयन्॥
तद्ग्रन्थिमाश्रयत्तारस्त्रिमात्रो नादसंयुतः।
तद्ग्रन्थ्यग्रं च सावित्री देवमाता शिवाज्ञया॥
एवं द्वादशदैवत्यं ब्रह्मसूत्रं द्विजन्मनाम्।
ब्रह्माग्रे कल्पयामास वेदार्हाणामनुत्तमम्॥
येनांसे धृतमात्रेण ब्रह्मसूत्रेण ते द्विजाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवन्ति ब्राह्मणा नाम वेदार्हाश्च त्रयस्त्विह ॥
यावत्प्रभृति वामांसे ब्रह्मसूत्रं द्विजस्य तत् ।
गुरुः प्रतिष्ठापयति कालप्रभृति संयतः ॥
तावत्प्रभृति तस्यैव पिताऽऽचार्यः स उच्यते ।
माता च तस्य सावित्री द्वितीयं जन्म चोच्यते ॥

अथ यज्ञोपवीतपरिमाणम् ।

तत्र स एव,
आकटेस्तत्प्रमाणं स्याद्दीर्घं तु सुस्थितं तथा ।
कनिष्ठाङ्गुलवत् स्थूलं तदर्धं वा त्रिवृच्छुभम् ॥
आयुर्हरत्यतिह्रस्वमतिदीर्घं तपोहरम् ।
यशो हरत्यतिस्थूलमतिसूक्ष्मं धनापहम् ॥
पवित्रं परमं शुद्धमायुष्यं च श्रियावहम् ।
ओजस्यं ब्रह्मवर्चस्यं ब्रह्मसूत्रं तथोदितम् ॥ इति ।
कात्यायनोऽपि,
पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥
वसिष्ठः,
नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः ।
तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः ॥ इति ।
देवलोऽपि,
स्तनादूर्ध्वमधो नाभेर्न कर्त्तव्यं कथं चन । इति ।
मनुः,
स्तनादिनाभिपर्यंतं ब्रह्मसूत्रं पवित्रकम् ।
न्यूने रोगप्रवृद्धिः स्यादधिके धर्मनाशनम् ॥ इति ।

अथाश्रमविशेषेणोपवीतसंख्याविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र भृगुः,

उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते ।
एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ॥ इति ॥

तथाशब्दात्स्नातकग्रहणम् ।

तथा च वसिष्ठः,

स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम् ।
यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः ॥ इति ।

इतरयोः गृहस्थवानप्रस्थयोः ।

देवलोऽपि,

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्त्ते च कर्मणि ।
तृतीयमुत्तरीयार्थे वस्त्रालाभे तदिष्यते ॥ इति ।

यतीनां त्रिदण्डिनाम् । एकदण्डिनां शिखासूत्रत्यागाभिधानात् ।

कश्यपोऽपि,

त्रीणि चत्वारि पञ्चाष्ट गृहिणः स्युर्दशापिवा ।
उत्तमाश्रमिणस्त्वेकं व्रतिनस्त्वेकमेवहि ॥ इति ।

इयं च संख्या नित्यधारणे । काम्यं तु संख्यान्तरमपि ।

तथा च देवलः,

बहूनि चायुष्कामस्येत्यादि काम्यं प्रचक्षते । इति ।

बहुत्वं चात्र कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवसन्नम् ।

अन्यत्रापि,

आयुष्कामैः सदा धार्यं बहुयज्ञोपवीतकम् ।
पञ्चभिः पुत्रकामी स्यात् धर्मकामी तथैवच ॥ इति ।

इदं च ब्रह्मचारिणोऽपि भवति । आयुष्कामनाया आविशेषादित्येके । अन्ये तु गृहस्थस्यैवेत्याहुः । पुत्रकामादिसाहच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्यात्। कामनासिद्धिरपि यावज्जीवधारणादेव न सकृद्धारणेन। सदापदश्रवणात्। यस्तु

एकयज्ञोपवीतेन जपहोमादि यत्कृतम्।
तत्सर्वं विलयं याति न पितॄंश्चोपतिष्ठति ॥

इति निन्दार्थवादः, सोऽपि गृह्यादिविषय एव न ब्रह्मचारिविषयः। यज्ञोपवीतधारणं च क्रत्वर्थं पुरुषार्थं च।

तदाह कात्यायनः,

सदोपवीतिना भाव्यं सदा बद्धशिखेन च।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥ इति।

अत्र बद्धशिखत्वं ब्रह्मचारिणः शिखाजटत्वपक्षे। मुण्डत्वपक्षे तु न तन्नियमः। न च यज्ञोपवीतनाशे प्रायश्चित्तश्रवणात् केवलपुरुषार्थत्वं शङ्कनीयम्। विशिखो व्युपवीतश्चेत्यनेन कर्मवैगुण्यप्रतिपादनात्कर्माङ्गत्वासिद्धेः। सदाशब्दश्रवणाच्चोपवीतस्य कण्ठादनुत्तारणं गम्यते।

तथा च भृगुः,

मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम्।
नोद्धरेच्च ततः प्राज्ञो य इच्छेच्छ्रेय आत्मनः ॥
सकृच्चाधारणात्तस्य प्रायश्चित्ती भवेद् द्विजः। इति।

प्रक्षालनार्थं तु शाखाविशेषेणापवादमाह

स एव,

तैत्तिरीयाः कठाः काण्वाश्चरका वाजसनेयिनः।
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः ॥
बह्वृचाः सामगाश्चैव ये चान्ये यजुःशाखिनः।
कण्ठादुत्तार्य सूत्रं तु पुनरर्हन्ति संस्क्रियाम् ॥
संस्क्रियां मन्त्रेण धारणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यङ्गे चोदधिस्नाने मातापित्रोर्मृतेऽहनि ।
कण्ठादुत्तार्य सूत्रं तु कुर्याद्वै क्षालनं द्विजः ॥ इति ।

केशसंस्पृष्टे यज्ञोपवीते शुद्धिमाह

देवलः,

सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् ।
सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुत्क्षिपेत् ॥ इति ।

यज्ञोपवीतादिभङ्गे प्रतिपत्तिमाह

मनुः,

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रतः ॥ इति ।

भृगुः,

पाटितं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत् ।
नूतनं धारयेद्विप्रः स्नानसंकल्पपूर्वकम् ॥
आचम्य प्रतिसूत्रं तु त्रिगुणीकृत्य यत्नतः ।
यज्ञोपवीतमेकैकं प्रतिमन्त्रेण धारयेत् ॥

गोभिलः,

दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं स्कन्धमन्ववलम्बं भवति एवं यज्ञोपवीती भवतीति ।

यज्ञोपवीतधारणे कर्मविशेषेण देशविशेषमाह

परिशिष्टम्,

वामस्कन्धे यज्ञोपवीतं दैवे, प्राचीनावीतमितरथा पितृयज्ञे, नाभ्यां द्विकण्ठावसक्तमभिचारे, निवीतम् आपृष्ठदेशावलम्बि ग्राम्यधर्मेष्विति ।

इतरथा दक्षिणस्कन्धे। नाभ्यां, लग्नमिति शेषः । द्विकण्ठावसक्तं कण्ठपार्श्वद्वयलम्बितम् ग्राम्यधर्मो मैथुनम् । बहुवचनान्मूत्रपुरीषादेर्ग्रहणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवलोऽपि,

ब्रह्मसूत्रेऽपसव्येंऽसे स्थिते यज्ञोपवीतिता ।
प्राचीनावीतिता सव्ये कण्ठस्थे च निवीतिता ॥ इति ।

श्रुतिरपि ।

दक्षिणं बाहुमुद्धरते ऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं संवीतं मानुषमिति ।

अथावक्षारणम् ।

तत्राश्वलायनः,

समन्वारब्धे हुत्वोत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते पुरस्तात्प्रत्यङ्मुख इतरोऽपामञ्जली पूरयित्वा तत्सवितुर्वृणीमह इति पूर्णेनास्य पूर्णमवक्षारयन्नासिच्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति तस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात्सविता ते हस्तमग्रभीदसाविति द्वितीयमग्निराचार्यस्तवासाविति तृतीयम् आदित्यमीक्षयेद्देवसवितरेष ते ब्रह्मचारी तं गोपाय समामृतेत्याचार्यः कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि कस्त्वाकमुपनयते काय त्वा परिददामीति युवा सुवासाः परिवीत आगादित्यर्धर्चेनैनं प्रदक्षिणमावर्त्तयेत्तस्याध्यंसौ पाणी कृत्वा हृदयदेशमालभेतोत्तरेणेति ।

शौनकोऽपि ।

हुत्वैवमुत्थायाचार्यो वह्नेरुत्तरतोऽन्तिके ।
प्रदेशे प्राङ्मुखस्तिष्ठेच्छिष्योऽप्युत्थाय वह्निना ॥
व्यवधानं परिहरन्गत्वा ऽऽचार्यस्य पूर्वतः ।
आचार्याभिमुखः स्थित्वा घटयेत्त्वन्यमञ्जलिम् ॥
निदधाति तमप्यन्यो वारिणा पूरयेत्ततः ।
तत्सवितुर्वृणीमहे वयमित्यागृचाऽनया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्याञ्जलौ स्वाञ्जलिस्थमवक्षार्योदकं गुरुः ।
शिष्याञ्जलिगताश्चापो ऽवक्षार्य स्वेन पाणिना ॥
देवस्य त्वेति गृह्णामीत्यन्तं यजुरुदीर्य तु ।
शमन्ति नाम संबुद्ध्या निर्दिश्य च बटोः पुनः ॥
साङ्गुष्ठं दक्षिणं पाणिं गृह्णीयात्स्वेन पाणिना ।
एवमेव पुनः कुर्यादञ्जल्याः पूरणादिकम् ॥
हस्तग्रहणपर्यन्तं कर्म हस्तपरिग्रहे ।
तत्र मन्त्रस्तु सवितेत्यादिः स्यादितरत्समम् ॥
पुनश्च पूर्ववत्कुर्यादञ्जल्योः पूरणादिकम् ।
मन्त्रस्तत्राग्निराचार्यस्तवेत्यादिपरिग्रहम् ॥
विद्यतेऽतोऽन्यदखिलं तन्त्रं पूर्ववदाचरेत् ।
मन्त्रेण देवसवितरेष तेत्यादिना गुरुः ॥
आदित्यमीक्षयेच्छिष्यमथोभावपि पूर्ववत् ।
तिष्ठेतामुत्तरेणाग्निमन्योन्याभिमुखौ ततः ॥
धात्रे परिददाम्येनमिति संकल्पपूर्वकम् ।
कस्य ब्रह्मादिकं मन्त्रं ददाम्यन्तं गुरुर्जपेत् ॥
युवा सुवासा इत्याद्यमप्यर्धर्चमुदीर्य तम् ।
प्रदक्षिणमुपावर्त्य प्रापयेत्प्राङ्मुखं बटुम् ॥
अस्योपरि तदंसाभ्यां पाणी दत्त्वा ऽऽत्मनो गुरुः ।
तन्धीरासः कवय उन्नयन्तीत्याद्यमुत्तरम् ॥
अर्धर्चमुक्त्वोरोदेशं हस्ताभ्यां युगपत्स्पृशेत् ।
ततः पूर्ववदासीत गुरुः शिष्येण चात्मना ॥
व्यवधानं परिहरन्नग्नेर्गत्वाऽन्तिके गुरोः । इति ।

अवक्षारणे कारणमाह

५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्वलायनः,

शुचित्वासिद्धये तस्य सावित्रीग्रहणे गुरुः ।
अभिमन्त्र्य यथा वारि सिञ्चसेव तदञ्जलौ ॥
एवं त्रिवारं शिष्यस्य हस्तं गृह्णाति देशिकः ।
सम्बुद्ध्या पावकं यावत् साक्षीकृस गुरुस्तदा ॥
हस्तं गृह्णीत शिष्यस्य मन्त्राशिष्यत्वसिद्धये ।
सूर्यात्मा देशिको भूत्वा पावकात्मा च संयतः ॥
शिष्योऽसीति च सम्बुद्ध्या शृण्वन्तमिति निर्दिशेत् ।
कर्मसाक्षिणमादित्यं तर्पयेत्तं यथोक्तवत् ॥
सर्वव्रतानां भगवान् सूर्योऽधिपातिरीश्वरः ।
कालकर्मगुणानां च तस्मात्तं तर्पयेत्तदा ॥
ततो व्रतानां पतये ददाति रवये बटुम् ।
रवेः समानताऽर्थाय रक्षार्थं तद्बटोरपि ॥
असामर्थ्यात्समाहर्तुमात्मनस्तं गुरुः पुनः ।
ददाति मन्त्रवद्गृह्य प्रजानां पतये पुनः ॥
प्रजापतये सूर्याय ताभ्यां दत्त इति स्मरन् ।
गृहीत्वैवानयोः शिष्यं समालभ्यात्मसात्करोत् ॥
कुर्वन्स्येवात्मसात्सन्तः सर्वान्पूर्वमुखस्थितान् ।
तस्मात्पूर्वमुखं कृत्वा गृह्णीयादित्थमेव तम् ॥
गुरोरग्नेः प्रधानत्वात्प्रागग्नौ जुहुयाद्बटुः । इति ।

पारस्करः,

अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयत्यापोहिष्ठेति तिसृभिरथैनं सूर्यमुदीक्षयति तच्चक्षुरित्यथास्य दक्षिणांसमधिहृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमित्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थास्य दक्षिणं हस्तं गृहीत्वा को नामासीत्यसावहं भो इति प्रत्या-हार्थैनमाह को नामासि कस्य ब्रह्मचार्यसीति भवत इत्युच्यमाने इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविसथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्याइति ।

अथ समिदाधानम् ।

तत्राश्वलायनः,

अग्निं परिसमूह्य ब्रह्मचारी तूष्णीं समिधमादध्यात्तूष्णीं वै प्राजापत्यं प्राजापत्यो ब्रह्मचारी भवतीति विज्ञायते मन्त्रेण हैकेन ।

शौनकोऽपि,

आसित्वा दक्षिणे तस्य वह्निं परिसमुह्य च ।
तूष्णीं समिधमादध्यात्प्राङ्मुखो, "यादि वाग्नये" ॥
इत्यादिकं खिलं मन्त्रं स्वाहेत्यन्तमुदीर्य तु ।
आदध्यादेवमादाय समिधं पाणिना ततः ॥
अपः स्पृष्ट्वाऽग्निना वक्त्रं संवृतोऽष्टपुटद्वयम् ।
तेजसामासमित्यादिमन्त्रेण परिमृज्य तत् ॥
पाणिं प्रक्षाल्य भूयोऽपि स्पृष्ट्वास्पृष्ट्वा ऽनलं, मुखम् ।
त्रिर्निर्मृज्य तथा पाणिं क्षालयेच्च पुनःपुनः ॥
अथोत्थायाञ्जलिं कृत्वा हृदये परिधाय च ।
मयि मेधां मयीत्याद्यैः षड्भिर्मन्त्रैर्विभावसुम् ॥
उपतिष्ठेदिति शेषः ।

पारस्करोऽपि,

अत्र समिदाधानं पाणिनाऽग्निं परिसमूहत्यग्ने सुश्रवः सुश्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं मा१ सुश्रव-स्सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति प्रदक्षिणमग्निं पर्युक्ष्यो-त्तिष्ठन्समिधमादधाति अग्ने समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यसे एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्य-निराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहेति ।

अथ गायत्र्युपदेशः ।

तत्राश्वलायनः,

जान्वोच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भो अनुब्रूहीति तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वां यथाशक्ति वाचयीतेति ।

शौनकोऽपि,

इत्येवमभिवाद्यैनं विनयावनताकृतिः ।
भूत्वोपदेशं सावित्र्याः शिष्यो वाञ्छन्नधीहि भोः ॥
सावित्रीं भो अनुब्रूहीत्युक्त्वा आसीत पार्श्वतः ।
अथाचार्योऽपि शिष्यस्य पाणी तु धृतवाससा ॥
पाणिप्रदेशेनाच्छाद्य पाणिभ्यां परिगृह्य च ।
सावित्रीं स्वयमाचार्यः पूर्वं पच्छस्तथैव तम् ॥
शिष्यं च वाचयेत्पश्चादुच्चार्यार्धर्चशः स्वयम् ।
तथैव वाचयेच्छिष्यमथोक्त्वा सकलां स्वयम् ॥
पूर्वं तथैव शिष्यं च वाचयेदित्ययं क्रमः ।
त्रिष्वप्येतेषु योगेषु यथा शिष्यस्तु शक्नुयात् ॥
वक्तुं तथैव आचार्यो वाचयेदवधानतः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारस्करः,

अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय दक्षिणतस्तिष्ठत, आसीनायेत्येके । पच्छोऽर्धर्चशः सर्वां च । स हि तृतीयेन सहानुवर्त्तयन्संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादिति ।

हारीतः,

तस्मादुपेतायोपसन्नाय समीक्षिताय समीक्षमाणाय ब्रह्मानुब्रुवन्ति नेतरेभ्यस्तान् ब्रह्मचारिण इत्याचक्षतइति । ब्रह्मशब्दोऽत्र सावित्रीपरः ।

यमः,

ॐकारपूर्विकास्तिस्रः सावित्रीं यश्च विन्दति ।
चरति ब्रह्मचर्यं च स वै श्रोत्रिय उच्यते ॥

तिस्रः, महाव्याहृतीरिति शेषः ।

मनुः,

एतयर्चाऽपि संयुक्तः काले च क्रियया ऽमुया ।
विप्रक्षत्रियविड्योनिर्गर्ह्यतां याति साधुषु ॥

एतयर्चा तत्सवितुर्वरेण्यमित्यनया ।

लौगाक्षिः,

ॐभूर्भुवःस्वरित्युक्त्वा तत्सवितुरिति सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वामन्तत इति ।

तत्सवितुरितीतरयोरप्युपलक्षणम् । सावित्रीत्वाविशेषात् ।

तथाच कात्यायनः,

सावित्र्या ब्राह्मणमुपनयेत् त्रिष्टुभा राजन्यं जगत्या वैश्यं सर्वेषां वा सावित्रीति ।

तत्स्वरूपमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शातातपः,

तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य, देवसवितुरिति राजन्यस्य, विश्वारूपाणीति वैश्यस्येति ।

अथ पाण्याधानम् ।

तत्राश्वलायनः,

हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिं निदधाति मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ।

शौनकोऽपि,

ततः शिष्योरसि मम व्रतइत्यादिमन्त्रतः ।
निधायोर्ध्वाङ्गुलिं पाणिमथाबध्नीत मेखलाम् ॥
दण्डं चास्मै प्रदायोक्तं ब्रह्मचर्यं च निर्दिशेत् । इति ।

हिरण्यकेश्यपि,

अथास्य दक्षिणेन हस्तेन दक्षिणमंसमुपर्युपर्यन्ववमृश्य हृदयदेशमभिमृशति मम हृदये हृदयं ते अस्तु मम चित्तं चित्तेनान्वेहि मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यं मामेवानुसंधत्स्व मयि चित्तानि सन्तु ते मयि सामीच्यमस्तु ते मह्यं वाचं नियच्छतादिति ।

अथ मेखला ।

तत्राश्वलायनः,

तेषां मेखला मौञ्जी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्यावी वैश्यस्येति । मुञ्जास्तृणविशेषाः तत्कृता मेखला मौञ्जी । धनुर्ज्या धनुषोपनीय ग्राह्या मौर्वी । अविरूर्णायुस्तद्रोमभिः कृता आवी ।

पारस्करोऽपि,

मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्यकेश्यपि,

मौञ्जीं मेखलां त्रिवृतां ब्राह्मणस्य ज्यां राजन्यस्यावीसूत्रं वैश्यस्येति ।

गौतमोऽपि,

मौञ्जीज्यामौर्वीशणसूत्र्यो मेखलाः क्रमेणेति । ज्या चासौ मौर्वी चेति कर्मधारयः । ज्यापदेनैवार्थसिद्धौ मौर्व्युपादानं धनुषोपनीय ग्रहणासंभवे मूर्वानिर्मितरज्जुमात्रग्रहणार्थम् ।

विष्णुरपि,

तेषां मुञ्जज्याबल्वजमय्यो मेखलाः क्रमेणेति ।

वसिष्ठोऽपि,

मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य शणतान्तवी वैश्यस्येति ।

पैठिनसिरपि,

मौञ्जी मेखला ऽश्मन्तकजा वा ब्राह्मणस्य वैल्वजा मौर्वी वा राजन्यस्य शाणी क्षौमी वा वैश्यस्येति ।

मेखला कटिवेष्टनरज्जुः । अश्मन्तकः कुशसदृशस्तृणविशेष इति कल्पतरुः। वैल्वजा विल्वत्वग्निर्मिता। मूर्वा तेजनी मोलेति दाक्षिणात्यानां प्रसिद्धा । मरलेति द्रविडानाम् । तन्निर्मिता रज्जुर्मौर्वी। अयं च विकल्पो यथाशाखं यथासंभवं वा द्रष्टव्यः ।

आपस्तम्बोऽपि,

मौञ्जी मेखला त्रिवृत् ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानां, धनुर्ज्या राजन्यस्य मौञ्जी वा, अयोमिश्रा आविकसूत्रं वैश्यस्य सैरी ताम्बूली वेत्येके । शक्तिविषये मुञ्जप्राप्तौ संभवन्त्यां दक्षिणावृत्तानां प्रदक्षिणावर्त्तितानां योग्यत्वान्मुञ्जादिद्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याणामित्यर्थः। अयोमिश्रा लोहसूत्रयुक्ता। सैरी सीरस्य हलस्य योत्क्रमिति यावत् । ताम्बूली मूलोदकवृक्षकृतेति कपर्दी॥

गोभिलः,

मुञ्जकाशताम्बूल्यो रशना भवन्तीति ।

बैजावापोऽपि,

मेखलां त्रिगुणां प्रसलविसृष्टां प्रदक्षिणं त्रिः परिहरन्तीति। प्रसलं प्रदक्षिणं यथा भवत्येवं सृष्टां निर्मितां परि समन्तान्नयन्ति। प्रदक्षिणं यथा भवति तथा त्रिर्वेष्टयन्ति ।

अथ मेखलालक्षणम् ।

तत्र मनुः,

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेवच। इति ।

त्रिवृत् त्रिगुणवलिता। समा मध्ये निम्नोन्नतत्वरहिता। श्लक्ष्णा मृदुलस्पर्शा। त्रिवृता कटौ त्रिवारं वेष्टिता। एकत्रिपञ्चग्रन्थियुक्ता मेखलेति । मेखलायामयं गुणविधिः। तत्र च त्रिवृत्त्वरूपो गुणो विधीयमानो ज्यायां नान्वेति । स्वरूपविनाशप्रसङ्गात्। यत्र त्वविरोधस्तत्रान्वेत्येव। यथा शणतान्तव्याम्। त्रिवृता ग्रन्थिनेति। नायमैच्छिको विकल्पः, किं तु प्रवरसमसंख्यानियमार्थः यथार्षिशिखावत् ।

संख्यान्तरमप्याहाश्वलायनः,

त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता ।
तद्ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः ॥
वेदत्रयेणावृतोऽहमिति मन्येत स द्विजः ।
तद्ग्रन्थयस्तदङ्गानि तद्रहस्यानि संस्मरेत् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रचेता अपि, त्रिगुणा प्रदक्षिणा मेखलेति ।

अथानुकल्पाः ।

तत्र मनुः,

मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः । इति ।

मुञ्जग्रहणमुक्तद्रव्योपलक्षणम् । प्रतिनिधौ त्रित्वदर्शनात् । तेन मुञ्जमूर्वाशणानामभावे वर्णत्रयस्य क्रमेण कुशादयो ग्राह्या इत्यर्थ इति केचित् । वस्तुतस्तु एकैकस्याः मेखलायास्त्रयस्त्रयः प्रतिनिधयः कुशाश्मन्तकबल्वजाः प्रतिनिधयो मेखलाया इत्याकारकश्रुतिकल्पने लाघवात् । अन्ये तु मुञ्जग्रहणाद् ब्राह्मणं प्रत्येवायं प्रतिनिध्युपदेशो नान्यं प्रति । तथाच क्षत्रियादीनां विहितद्रव्यालाभे तत्तत्सदृशगुणं तृणादि ग्राह्यमित्याहुस्तन्न ।

एतासामप्यलाभे तु कुशाश्मन्तकबल्वजैः ।

इति वाक्येन मुञ्जशब्दस्योपलक्षणपरत्वावश्यंभावात् । वाचनिकात्प्रतिनिधेर्नैयायिकस्य दुर्बलत्वाच्च । वाचनिकस्याप्यभावे नैयायिको ग्राह्यः ।

उक्तं च त्रिकाण्डमण्डनाचार्यैः,

शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते ।
यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥ इति ।

शिष्टस्य विहितस्येत्यर्थः । अत्र च मुञ्जादिस्थाने विहितानां कुशादीनां प्रतिनिधित्वान्मुञ्जधर्मतन्त्रिवृत्त्वादिधर्मलाभो भवति नीवारेष्विव व्रीहिधर्माणां प्रोक्षणावघातादीनामिति ।

यमोऽपि,

विप्रस्य मेखला मौञ्जी ज्या मौर्वी क्षत्रियस्य च ।
शणसूत्री तु वैश्यस्य मेखला धर्मतः स्मृताः ॥
एतासामप्यलाभे तु कुशाश्मन्तकबल्वजैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेखलास्त्रिवृतः कार्याः ग्रन्थिनैकेन वा त्रिभिः ॥ इति ।

पारस्करोऽपि,

मुञ्जाभावे कुशाश्मन्तकबल्वजानामिति ।

शङ्खोऽपि, सर्वेषां वा मौञ्जीति ।

अथ दण्डाः ।

तत्राश्वलायनः, तेषां दण्डाः पालाशो ब्राह्मणस्यौदुम्बरः क्षत्रियस्य बैल्वो वैश्यस्येति ।

पलाशशब्दोऽत्र वृक्षवचनो न पत्रवचनः । औदुम्बरादिसाहचर्यात् ।

पारस्करः,

पालाशो ब्राह्मणस्य दण्डो बैल्वो राजन्यस्यौदुम्बरो वैश्यस्येति।

हिरण्यकेशी,

बिल्वं पालाशं वा दण्डं ब्राह्मणस्य नैयग्रोधं राजन्यस्यौदुम्बरं वैश्यस्येति ।

मनुः,

ब्राह्मणो बिल्वपालाशौ क्षत्रियो वटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥

पीलुर्गुडफलः । पीलुर्गुडफलः स्रंसीति त्रिकाण्डीस्मरणात्। तत्संबन्धी पैलवः ।

विष्णुः,

पालाशखादिरौदुम्बरा दण्डा इति ।

भविष्यपुराणे,

ब्राह्मणे बैल्वपालाशौ तृतीयः प्लक्षजस्तथा ।
न्यग्रोधखादिरौ क्षत्रे तथाऽन्यो वेतसोद्भवः ॥
पैलवौदुम्बरौ वैश्ये तृतीयोऽश्वत्थजस्तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दण्डानेतान्महाबाहो धर्मतोऽर्हन्ति धारितुम् ॥

शङ्खः,

पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्त्तिताः ।

पर्णः पलाशः ।

पैठीनसिः,

औदुम्बरो बादरो वारणो वा वैश्यस्य । वारणः वरणवृक्षोद्भवः ।

मनुः,

विप्रस्य दण्डः पालाशो बैल्वो वा धर्मतः स्मृतः ।

आश्वत्थः क्षत्रियस्याथ खादिरो वापि धर्मतः ॥

औदुम्बरोऽथ वैश्यस्य प्लाक्षो वा दण्ड उच्यते ।

अथानुकल्पाः ।

तत्र पारस्कराश्वलायनौ,

सर्वे वा सर्वेषामिति ।

गौतमः,

यज्ञियो वा सर्वेषामिति । यज्ञियो यज्ञार्हवृक्षीयः । स चाभिहितो

ब्रह्मपुराणे,

शमीपलाशन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।

अश्वत्थोदुम्बरौ बिल्वश्चन्दनः सरलस्तथा ॥

सालश्च देवदारुश्च खदिरश्चेति यज्ञियाः । इति ।

यमः,

एतेषामप्यलाभे तु सर्वेषामेव याज्ञियाः। इति ।

शौनकोपि,

एतेषामप्यलाभे तु सर्वेषां यज्ञियाः स्मृताः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपस्तम्बोऽप्याह, वार्क्षो दण्ड इत्यवर्णसंयोगेनैकउपदिशन्तीति।

अथ दण्डलक्षणम्।

तत्र मनुः,

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः॥ इति।

गौतमोऽपि,

अपीडिता यूपवक्राःसवल्का इति। अपीडिता वल्लिवेष्टनादिभिः। यूपवक्रा यूपवदवनताग्राः।

तथाच व्यासः,

शिरोललाटनासाग्रप्रमाणा यूपवन्नताः। इति।

पैठीनसिरपि,

अपीडिता यूपवक्राः सशल्का इति।

दण्डपरिमाणं चाश्वलायने, केशसम्मितो ब्राह्मणस्य, ललाटसम्मितः क्षत्रियस्य, घ्राणसम्मितो वैश्यस्येति।

पारस्करोऽपि, केशसम्मितो ब्राह्मणस्य दण्डो, ललाटसम्मितः क्षत्रियस्य, घ्राणसम्मितो वैश्यस्योति।

मनुः,

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः॥

केशान्तिको मूर्धप्रमाण इत्यर्थः। अत एव दण्ड इत्यनुवृत्तौ गौतमः, मूर्धललाटनासाग्रप्रमाणा इति। अत्र विशेषमाह

वसिष्ठः,

घ्राणसम्मितो ब्राह्मणस्य, ललाटसम्मितः क्षत्रियस्य, केशसम्मितो वैश्यस्येति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्खः,

केशावधिललाटान्तास्तुल्याः प्रोक्ताः क्रमेण तु। इति।

विष्णुरपि,

पालाशखादिरौदुम्बरा दण्डाः केशान्तललाटनासादेशतुल्या इति।

शङ्खलिखितावपि, बिल्वपालाशखादिराश्वत्थपैलवौदुम्बरा दण्डाः केशललाटवक्त्रान्ता इति।

एतेषां नित्यधारणमाह याज्ञवल्क्यः,

दण्डाजिनोपवीतानि मेखलां चैव धारयेत्। इति।

एतेषां धारणकारणमाहाश्वलायनः,

व्रतिनां लक्ष्यसिद्ध्यर्थं मृगाजिनमिहेष्यते।
मेखला च पवित्रं च रक्षाशुद्ध्यर्थमेव वा॥
अदान्तं दमयित्वा मां मार्गे संस्थापयन्स्वयम्।
दण्डः करे स्थितो यस्मात्तस्माद्रक्षा यतोऽभयम्॥
इति नित्यं स विमृशन् पश्यन् दण्डं करास्थितम्।
स्वधर्मं न त्यजेद्धीमान्विधर्माणि न चाश्रयेत्॥ इति।

अथ ब्रह्मचारिणां व्रतोपदेशः।

तत्राश्वलायनः,

मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ब्रह्मचार्यसि अपोशानकर्म कुरु दिवा मा स्वाप्सीराचार्याधीनो वेदमधीष्व द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहणान्तं वा सायं प्रातर्भिक्षेत सायंप्रातः समिधमादध्यादिति।

अथाद्यभिक्षाचरणम्।

तत्राश्वलायनः,

अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वा, भिक्षां भवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्ददात्विसनुप्रवचनीयमिति वा, तद्वाचार्याय वेदयेत तिष्ठेदहःशेषमिति ।

अयं नियमोऽनुप्रवचनीयभैक्षे । कुतः । अनुप्रवचनीये भिक्षां भवान्ददात्विति भैक्षमन्त्रात् । भिक्षापदस्थानेऽनुप्रवचनीयपदं वा पठेत् । स्त्रियं प्रति भिक्षा चेदुभयविधेऽपि मन्त्रे भवतीपदस्यैवादौ प्रयोग इति वृत्तिकृत् । शौनकस्तु स्त्रीपुरुषयोरुभयोरपि भिक्षणे भिक्षाशब्दस्यैवादौ प्रयोगं वक्ष्यति । तल्लब्धं व्रीह्यादि आचार्याय निवेद्याहःशेषं तिष्ठेदेव नोपविशेदित्यर्थः ।

स्मृतिरूपेणाप्याह स एव,

अप्रत्याख्यायिनीं नारीमप्रत्याख्यायिनं नरम् ।
ब्रह्मौदनार्थं विप्रार्थं सुशुद्धान्याचयेत्तदा ॥
पात्रं गृहीत्वा संयाच्य भिक्षामाहृत्य तत्स्वयम् ।
निवेद्य गुरवे दत्त्वा प्रैषं श्रुत्वा समापयेत् ॥
आचारान्संविनिर्दिश्य भवेदाचार्यता गुरोः ।
प्रैषेण प्रेषयेत्तस्माच्छिष्यं गृह्योक्तवर्त्मना ॥
दिनशेषं नयंस्तिष्ठेत्प्रैषप्रभृति तु व्रती ।
सावित्र्या संप्रवृत्त्यर्थं विण्मूत्रोत्सर्जनादृते ॥ इति ।

शौनकोऽपि,

ब्रह्मचारी निशारम्भे पक्तुं ब्रह्मौदनं चरुम् ।
द्विजान् भोजयितुं पश्चाद् द्रव्यं भिक्षेत बान्धवान् ॥
अप्रत्याख्यायिनः पुंसः स्त्रियो वा तादृशीः पुनः ।
भिक्षेत पात्रहस्तः सन्प्राप्य प्राप्य तदन्तिकम् ॥
अग्रे भिक्षेत जननीमप्रत्याख्यायिनी च या ।
पश्चात्पितरमन्येऽपि ये वा स्युर्बान्धवास्ततः ॥
अत्र प्रकारो भिक्षामित्युक्त्वा पूर्वं ततः परम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवान्ददात्विति ब्रूयात्पुरुषं प्रति भिक्षणे ॥
स्त्रियं तु भिक्षां भवती ददात्वित्यभियाचितम् ।
लब्धं विज्ञाप्य गुरवे तत्पार्श्वे तन्निधाय च ॥
तत्संन्निधावचपलस्तिष्ठेदादित्यसंक्षयात् । इति ।
भिक्षास्वरूपमाह ।
सुवर्णं रजतं रत्नं सा पात्रेऽस्य विनिक्षिपेत् । इति ।

अथ मध्याह्नसंध्यानिर्णयः ।

तत्र जैमिनिः,
यावद् ब्रह्मोपदेशो न तावत्संध्यादिकं नच ।
ततो मध्याह्नसंध्यादि सर्वं कर्म समाचरेत् ॥ इति ।

ब्रह्मोपदेशो गायत्र्युपदेशः । ततः गायत्र्युपदेशानन्तरमित्यर्थः । मध्याह्नसंध्यैवादिर्यस्य तत् तेन मध्याह्नसंध्यात एव सर्वकर्मारम्भोऽवगम्यते ।

स्मृत्यन्तरे तु,
उपानयेऽह्नि कर्त्तव्यं सायंसंधेरुपासनम् ।
आरभेद् ब्रह्मयज्ञं तु मध्याह्ने तु परेऽहनि ॥ इति ।

तद्यथाशाखं व्यवस्थापनीयम् । यद्वा सायंसंधेरुपासनमिति न मध्याह्नसंध्याव्यवच्छेदकमिति न विरोधः । ब्रह्मयज्ञस्य तु वेदारम्भाभावादेवाप्राप्तावपि वचनात् द्वितीयदिनमध्याह्नमारभ्य गायत्र्यां कर्तव्यतोच्यते । तथाच

जैमिनिः,
अनुपाकृतवेदस्य कर्त्तव्यो ब्रह्मयज्ञकः ।
वेदस्थाने तु सावित्री गृह्यते तत्समा भवेत् ॥ इति ।

अथानुप्रवचनीयः ।

तत्राश्वलायनः, अस्तमिते ब्रह्मौदनमनुप्रवचनीयं श्रपयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाऽऽचार्याय वेदयीताचार्यः समन्वारब्धे जुहुयात्सदसस्पतिमद्भुतमिति सावित्र्या द्वितीयं यद्यत्किंचात ऊर्ध्वमनूक्तं स्यादृषिभ्यस्तृतीयं सौविष्टकृतं चतुर्थं ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयीतेति॥

अस्यार्थः । ब्रह्मभोजनार्थ ओदनो ब्रह्मौदनः । ब्रह्मशब्दो ब्राह्मणवाचकः ।

वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ।

इत्यभिधानात् । तेन ब्राह्मणभोजनं विधास्यमानमत एव चरोर्भवति । अनुप्रवचननिमित्तमनुप्रवचनीयम् । पाकयज्ञविधानेन ब्रह्मचार्यनुप्रवचनीयं श्रपयित्वाऽऽचार्याय निवेदयेच्छ्रुतः स्थालीपाक इति । सावित्री तत्सवितुर्वरेण्यमित्येषा प्रसिद्धा । द्वितीयग्रहणमुत्तरार्थं यद्यच्चात ऊर्ध्वमित्यादि । अत्र सावित्र्यनूक्तेति कृत्वा सावित्र्या द्वितीयं जुहोति । अत ऊर्ध्वमपि महानाम्न्यादिव्रतेषु यद्यदनूक्तं तेनतेन द्वितीयं जुहोति । एतदुक्तं भवति । महानाम्न्यादिव्रतेषु श्रावणान्तेष्वनुप्रवचनीयहोमः कार्यः । तत्र च सावित्र्याः स्थाने महानाम्नीभ्यः स्वाहा महाव्रताय स्वाहा उपनिषदे स्वाहा इत्येवं द्वितीयं जुहोति । अन्यत्समानमिति । द्वितीयग्रहणं महानाम्न्यादिनामधेयेन होमार्थम् । इतरथा मन्त्रेण होमे क्रियमाणे प्रतिमन्त्रं स्वाहाकारः प्राप्तः स्यात् । स च प्रदानार्थ इति कृत्वा अनेकाहुतयः स्युः । ततश्चोत्तरासां द्वितीयत्वं न स्यात् । तस्माद् द्वितीयग्रहणम् । ऋषिभ्यस्तृतीयमिति तृतीयवचनमृषिभ्य इत्यस्य विधायकत्वं निवर्त्य मन्त्रत्वज्ञापनार्थं, तेन ऋषिभ्यः स्वाहेति जुहोतिसंख्यावचनं नियमार्थम् चतुर्थमेव न षष्ठमिति । तेनाज्यभागौ न भवतः । तयोः सतोरिदं हि षष्ठं स्यादिति । ततश्च सदसस्पतिमित्यृचा प्रथमाहुतिः । तत्सवितुरिति द्वितीया । ऋषिभ्यः स्वाहेति तृतीया । स्विष्टकृच्चतुर्थी । ततः प्रायश्चित्तादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होमशेषः । ततो बटुरवशिष्टान्नेन ब्राह्मणान्गुरुं च भोजयित्वा वेदसमाप्तिं वाचयेत् ।

स्मृतिरूपेणाप्याहाश्वलायनः,

भैक्षं लब्धं दिवा यत्तत् स्थालीपाकं निरूप्य च ।
हुत्वा द्विजान् भोजयित्वा भुञ्जीयाच्च द्विजः स्वयम् ॥
उपास्य विधिवत्संध्यां हुत्वाहुत्वा व्रती निशि ।

हुत्वाहुत्वेति वीप्सावचनं सायंकालीनमग्निकार्यं कृत्वाऽनुप्रवचनीयहोमः कार्य इत्येवमर्थम् ।

शौनकोऽपि,

सायंसंध्याविधिं कृत्वा अथोपनयनानले ।
आधाय समिधं पूर्वं ततोऽन्वाधानपूर्वकम् ॥
पूर्णपात्रनिधानान्तं तन्त्रं कृत्वा पुरस्तनम् ।
ततो लब्धं च तद्भैक्षं द्विजान् भोजयितुं तथा ॥
होमं च कर्त्तुं पर्याप्तं पृथक्कृत्य निरूप्य च ।
चरुं पचेत्सर्वथैव पक्तुं स्थाल्यां न शक्नुयात् ॥
तदा तदर्थं तद्बन्धुः कश्चित्तत्कृत्यमाचरेत् ।
अथ विज्ञापयेच्छिष्यः श्रृतो ब्रह्मौदनश्चरुः ॥
अनुप्रवचनीयो वेत्याचार्यस्तदनन्तरम् ।
आज्यसंस्कारमारभ्य श्रृतावस्थापनावधि ॥
तन्त्रं कृत्वा ऽथ शिष्येण स्पृष्टः शेषं पुरस्तनम् ।
इध्माधानादिकं तन्त्रमाज्यभागद्वयं विना ॥
ततोऽवदानधर्मेणाववदाय हविः स्रुचि ।
सदसस्पतिमद्भुतं प्रियमित्याद्यृचाऽऽहुतिम् ॥
आद्यां कृत्वा ऽथ सावित्र्या द्वितीयाहुतिमाचरेत् ।
पश्चादृषिभ्यः स्वाहेति तृतीयाहुतिमाचरेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थे स्विष्टकृद्धोमं कृत्वोर्ध्वं तन्त्रमाचरेत् ।
होमावशिष्टमन्नं च ब्राह्मणान् भोजयेदथ ॥
भुक्तवद्भिश्च तैर्वेदसमाप्तिं वाचयेदपि ।
ब्रूयाद्द्विजान्गुरुर्वेदसमाप्तिं वदतेति तान् ॥
समाप्तिरस्त्विति ब्रूयुस्तेऽपि वेदपदात्परम् । इति ।

अयं चोपनयनाग्निरामेधाजननं रक्षणीयः । तथाच शौनकः,

आमेधाजननाद्रक्षेत्तमौपनयनानलम् ।
तत्रैव सायं प्रातश्च समिधं जुहुयादसौ ॥ इति ।

अत एवानुप्रवचनीये औपनायनिकाग्नावेव ततोऽन्वाधानपूर्वकमिति अन्वाधानमुक्तवान् । कारिकाकारमते तूपनयनाग्निरामेधाजननं रक्षणं नास्तीति गम्यते । अनुप्रवचनीये उपलेपादि पूर्ववदिति स्थण्डिलान्तरसंस्काराभिधानात् ।

अथोपनयनानन्तरं ब्रह्मौदनात् प्राक् गर्जिते शान्तिविशेषः ।

बौधायनीयशान्तिसर्वस्वे,

ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं भवेत् ।
तदा विघ्नकरं ज्ञेयं बटोरध्ययनस्य तत् ॥
तस्य शान्तिप्रकारं तु वक्ष्ये शास्त्रानुसारतः ।
स्वस्तिवाचनपूर्वं तु हवनं कारयेद् बुधः ॥
प्रधानं पायसं साज्यं द्रव्यं शान्तियजौ भवेत् ।
सूक्तं बृहस्पतेर्विद्वान् पठन्प्रज्ञाविवृद्धये ॥
गायत्री युज्यते मन्त्रः प्रायश्चित्तं तु सर्पिषा ।
धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीम् ॥
शिलां होमविधेः पश्चात् स्थापयेत्तत्र संसदि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणान् भोजयेत्पश्चात्ततो ब्रह्मौदनं चरेत् ॥
संभावनायां गर्जस्य दिवैव श्रपयेच्चरुम् ।
सायं च जुहुयाद्धोममेवं दोषो न कश्चन ॥ इति ।

अथ ब्रह्मचारिणस्त्रिरात्रव्रतादीनि ।

तत्राश्वलायनः,

अत ऊर्ध्वमक्षारालवणाशी ब्रह्मचार्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा चरितव्रताय मेधाजननं करोतीति ॥

स्मृतिरूपेणाप्याहाश्वलायनः,

अधः शयीत स्वयं च व्रती स्याद्वत्सरावधि ।
द्वादशाहं त्रिरात्रं वा तदन्ते गुरुणाऽऽत्मनः ॥
कारयेद्विधिना कर्म मेधाजननसंज्ञितम् । इति ।

शौनकोऽपि,

अत ऊर्ध्वं हविष्याशी त्रिरात्रं ब्रह्मचर्यवान् ।
अधःशायी च वर्तेत गुरोश्चित्तं प्रसादयेत् ॥
एवं द्वादशरात्रं वा वर्त्तेताब्दमथापि वा ।
शक्त्यपेक्षया कल्पः स्याद्व्रते तु ब्रह्मचारिणः ॥
एवं कृतव्रतस्यास्य चतुर्थे दिवसे गुरुः ।
त्रयोदशे वाऽब्दान्ते वा मेधाजननमाचरेत् ॥ इति ।

हिरण्यकेश्यपि,

त्र्यहं व्रतं चरत्यक्षारमलवणमशमीधान्यं भुञ्जानोऽधःशाय्यमृन्मयकांस्यशूद्रोच्छिष्टमधुमांसाश्यदिवास्वाप्युभौ कालौ भिक्षाचर्यमुदकुम्भमित्याहरन्नहरहः काष्ठकलापमुभौ कालौ सायंसायं वा समिधोऽभ्यादधाति पुरस्तात्परिषेचनात् यथाहृतद्वसवो गौर्यमिति प्रदक्षिणमग्निं परिमृज्य परिषिञ्चति यथा पुरस्ताद्व्याहृतिभिस्समिधोऽभ्यादधात्येकैकशः समस्ताभिश्चैषातइति मेधां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म इति अप्सरास्विति आमांमेधेतिमन्त्रैः स्वाहान्तैस्तथैव परिमृज्य परिषिञ्चति यथा पुरस्तात् यत्ते अग्ने तेज इत्येतैर्मन्त्रैरुपतिष्ठते मयि मेधां मयि प्रजामिति च त्र्यहे पर्यवेते तथैव त्रिवृताऽन्नेन ब्राह्मणान् परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वा व्रतं विसृजतेऽग्ने व्रतपते व्रतमचारिषमित्येतैस्सन्ततैरेतद्व्रतएवेति । त्रिवृताऽन्नेन चरुपक्कापक्कापिष्टात्मकेन ।

अथ मेधाजननम् ।

तत्राश्वलायनः, अनिन्दितायां दिश्येकमूलं पलाशं कुशस्तम्बं वा पलाशापचारे प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं वाचयति सुश्रवः सुश्रवा असीति ।

स्मृतिरूपेणाप्याह स एव,

कुर्यात्त्रिमेखलां वेदिं सर्वतो द्वादशाङ्गुलाम् ।
शुचौ प्रागुत्तरे भागे तस्यां मेधां समर्चयेत् ॥
पलाशशाखां तन्मध्ये पत्राङ्कुरसमन्विताम् ।
आर्द्रां वाऽथ कुशस्तम्बं समूलं स्थापयेद् गुरुः ॥
मेधामावाह्य मतिमान् मेधायै नम इत्यथ ।
गन्धपुष्पाक्षतैस्सम्यग् धूपदीपादिभिः पुरा ॥
इष्ट्वा निवेदयेदन्नं सक्तुमिश्रं सयावकम् ।
समोदकं निवेद्यान्नं पुनश्चाभ्यर्च्य पूर्ववत् ॥
प्रणम्य तस्यै मेधायै व्रती निस्सारयेज्जलम् ।
उच्चरन् सुश्रवोमन्त्रं जलं गृह्य प्रदक्षिणम् ॥
संस्राव्य तां नमस्कुर्यात् तथा कुर्यात्पुनः पुनः ।
एवं त्रिवारमावर्त्य दण्डाजिनकमण्डलून् ॥
वेद्यां निक्षिप्य च स्नात्वा वाससी च विनिक्षिपेत् ।
मेखलां चोपवीतं च, धृत्वाऽन्यानि, विनिक्षिपेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाससी ते स्वगुरवे मेधाजननकर्मणि ।
वेद्यां तावत्प्रभृत्येव कौपीनेन प्रवर्त्तयेत् ॥
पुण्याहवाचनं कृत्वा ब्राह्मणांश्चापि भोजयेत् ।
तमावहति सा मेधा मेधाजननकर्मणः ॥
तत्कर्त्तव्यं प्रयत्नेन व्रतस्य च समाप्तये । इति ।

शौनकोऽपि,

स्ववासापेक्षया ऽग्नेयीं दिशं याम्यां च नैर्ऋतीम् ।
वर्जयित्वा दिशो निन्द्यास्तिस्रोऽन्यस्यां दिशि स्थितम् ॥
पलाशं प्राप्य तत्रास्य मेधाजननमाचरेत् ।
अत्रैकमूलमित्येवं पलाशस्य विशेषणात् ॥
मूलप्रभृत्येवोद्भूतशाखाभेदसमन्वितम् ।
सर्वथा यस्य कस्यापि पलाशस्य त्वसम्भवे ॥
कुशस्तम्बमुपागम्य तं कुम्भानीतवारिणा ।
प्रदक्षिणं त्रिः परीतः सिञ्चन्तं ब्रह्मचारिणम् ॥
वाचयेन्मन्त्रमाचार्यः सुश्रवः सुश्रवा असि ।
इत्येवमादिकं भूयः समन्तमवधानतः ॥
प्रतिप्रदक्षिणं मन्त्रमप्यभ्यावर्त्य वाचयेत् ।
ततः पूर्वधृतं वस्त्रं मेखलाद्यखिलं बटुः ॥
पलाशमूले संन्यस्य सर्वाण्यन्यानि धारयेत् ।
गृहान्प्रतीयाद् गुर्वाद्यैः समस्तैर्बन्धुभिः सह ॥
पथि स्वस्त्ययनान्मन्त्रान्वदेयुर्बान्धवाः सह ।
अग्रतोऽस्य नयेयुस्ते वारिधारां च संतताम् ॥
ततः सन्मङ्गलैर्दीपैः पूर्णकुम्भादिभिर्युतः ।
प्रापयेद् गृहमाचार्यः पुण्याहं वाचयेद्द्विजैः ॥ इति ।

तस्य कारणमाह स एव,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या सावित्री जगद्धात्री सैव मेधास्वरूपिणी ।
मेधाप्रसिद्धये पूज्या विद्यासिद्धिमभीप्सता ॥ इति ।

संग्रहेऽपि,

वेदग्रहणसामर्थ्ययुक्ता मेधाऽनुजायते ।
येन तन्मेधाजननकर्मोपदिशति स्वयम् ॥ इति ।

अथ ब्रह्मचारिधर्माः ।

तत्रादौ शौचविधिः ।

तत्र दक्षः,

एका लिङ्गे गुदे तिस्रो दश वामकरे तथा ।
उभयोः करयोः सप्त एतच्छौचं प्रकीर्त्तितम् ॥
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥ इति ।

आचमनं तु क्रमप्राप्तम् आह्निके द्रष्टव्यम् । दन्तधावनं तु नास्त्येव । दन्तधावननृत्तगीतादि ब्रह्मचारी वर्जयेदिति गौतमस्मरणात् ।

अथ स्नानम् ।

तत्र गौतमः,

अपामुपस्पर्शनमिति । उपस्पर्शनं स्नानम् । तदप्यहरहः कर्तव्यम् । तत्र विशेषमाह

दक्षः,

प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ।
यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥ इति ।

विशेषान्तरमाह विष्णुः, दण्डवन्मज्जनमिति । दण्डवदित्यनेनाङ्गनैर्मल्यादि न कार्यमिति ध्वनितम् ।

तदाहापस्तम्बः,

नाप्सु श्लाघमानः स्नायादिति । इदं तु नित्यं स्नानपक्षे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षान्तरमाह गौतमः,

एके गोदानादि । गोदानं नाम षोडशे वर्षे कर्त्तव्यं व्रतम्। तद् व्रतेषु चतुर्थमाश्वलायनानां द्वितीयं छन्दोगानाम् ।

एके आचार्याः गोदानादि स्नानमिच्छन्ति न ततः प्राक् । दीक्षितव्रतस्यापि ब्रह्मचर्यदीक्षानियुक्तत्वात् । नित्यस्नानस्यायमार्थः प्रतिषेधः । नैमित्तिकं तु कर्त्तव्यम् । तत्र दण्डवदाप्लवनमेव ।

अथ संध्या ।

तत्र संवर्तः,

संध्यां प्रातः सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां संध्यामर्धास्तमितभास्कराम् ॥
तिष्ठन् पूर्वां जपं कुर्याद् ब्रह्मचारी समाहितः ।
आसीनः पश्चिमां संध्यां जपं कुर्यादतीव्रतः ॥

न विद्यते तीव्रता त्वरावत्ता यस्यासावतीव्रतः, अत्वरित इति यावत् ।

मनुरपि,

पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमाऽर्कदर्शनात् ।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ इति ।

गौतमोऽपि,

तिष्ठेत्पूर्वामासीनोत्तरां सज्योतिष्याज्योतिषो दर्शनाद्वाग्यत इति । अत्र विशेषमाह गौतमः, बहिः संध्यत्वं चेति । सायंप्रातर्द्वे संध्ये यस्य ग्रामाद्बहिर्भवतस्स बहिस्संध्यः तस्य भावः बहिस्संध्यत्वमिति ।

अथाग्निकार्यम् ।

तत्र याज्ञवल्क्यः,

अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवर्त्तोऽपि,

अग्निकार्यं च कुर्वीत मेधावी तदनन्तरम् । इति ।

मनुरपि,

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ।

सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥ इति ।

दूरादपरिगृहीतदेशात् ।

तथाचापस्तम्बः,

यथाकथंचन परिग्रहं मन्यते स्तेनो भवतीति । विहायसि अन्तरिक्षे ।

केचित्तु सायमेवाग्निकार्यमिच्छन्ति ।

तदाहापस्तम्बः,

सायमेवाग्नीन्धनमित्येके इति । अग्नीन्धनमग्निकार्यम् ।

लौगाक्षिरपि,

सायमेवाग्निमिन्धीतेत्येकेइति ।

समिदाहरणविधिमाह बैजावापः,

पुरोऽस्तमयात्प्रातः प्रागुदीचीं दिशं गत्वा अहिंसन्नरण्याद् समिधमाहरेदार्द्रामन्नाद्यकामः शुष्कां ब्रह्मवर्चसकामः उभयामुभयकाम इति । अहिंसन्नुपयुक्तादधिकमच्छिन्दन् । पुरोऽस्तमयादिति वदता अस्तमिते सूर्ये समिदाहरणं निषिध्यते ।

तथाचापस्तम्बः,

नास्तमिते समिदाहरणायोपगच्छेदिति ।

अथ समिन्नियमः

वायुपुराणे,

पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः ।

शमीरोहितकाश्वत्थास्तदलाभे ऽर्कवेतसौ ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्तालाभे यस्य कस्यापि यज्ञियवृक्षस्य ग्राह्या। समाख्याबलात्।
तथा च ब्रह्मपुराणं,
शमीपलाशन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
अश्वत्थोदुम्बरौ बिल्वश्चन्दनः सरलस्तथा ॥
शालश्च देवदारुश्च खदिरश्चेति यज्ञियाः ।
आपस्तम्बः, नाप्रोक्षितमिन्धनमग्नावादध्यादिति ।
सर्वकर्मसाधारणं समिल्लक्षणमाह कात्यायनः,
नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतरा क्वचित् ।
न विमुक्ता त्वचश्चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका न्यूना तथा न स्याद्विशाखिका ।
न सपर्णा न निर्वीर्या होमेषु च विजानता ॥
विशीर्णा विदला ह्रस्वा वक्राः ससुषिराः कृशाः ।
दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशिकाः ॥ इति ।
अत्र विशेषमाह मरीचिः,
प्रागग्राः समिधो देयास्ताश्च काम्येषु पाटिताः ।
काम्येषु च सशल्कार्द्रा विपरीता जिघांसतः ॥ इति ।
अग्निकार्यकरणे ऽलौकिकं हेतुमकरणे च प्रत्यवायं दर्शयति

हारीतः,
पुरा जग्राह वै मृत्युर्हिंसयन्ब्रह्मचारिणम् ।
अग्निस्तं मोक्षयामास तस्मात्परिचरेद्धि तम् ॥
ब्रह्मचारी यदा त्वग्नावादध्यात्समिधो न हि ।
गृह्णीयात्तं तथा मृत्युरादध्यात्समिधस्ततः ॥ इति ।

अथाभिवादनविधिः ॥

तत्र गौतमः,
स्वनाम प्रोच्याहमयमित्यभिवादो ज्ञसमवाये इति । ज्ञसमवाये
प्रत्यभिवादनविधिज्ञसमागमे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र विशेषमाह स एव, स्त्रीपुंयोगेऽभिवादनतोऽनियममेके। स्त्रीपुंयोगे जायापतिसमागमे। अभिवादनतः अभिवादने। सार्वविभक्तिकस्तसिः। एवं च तयोः समागमेऽभिवादने प्राप्ते प्रत्यभिवादनविधिज्ञस्यापि भर्त्तुरभिवादने यथोक्तो नियमो नास्ति किंतु नमस्कारमात्रमित्येकेषां मतम्।

मनुः,

अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्॥
नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वास्तथैवच॥
भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः॥
आयुष्मान् भव सौम्येति विप्रो वाच्योऽभिवादने।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः॥
यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥ इति।

ज्यायांसं वृद्धमभिवादयन्। अभिवादात्परम् अभिवादये इतिशब्दोच्चारणानन्तरम्। असौ अमुकनामाऽहमस्मीति स्वकीयं नाम विशेषमुच्चारयेदित्यर्थः। असाविति स्वं नामातिद्दिशेदिति हि यज्ञसूत्रे परिभाषितम्। अत्र ज्यायांसमित्यभिधानाद्यवीयसां पितृव्यमातुलादीनामभिवादने नायं प्रकारः। तत्प्रकारस्तु अग्रे वक्ष्यते। अत्र विप्रपदं क्षत्रियादीनामप्युपलक्षणम्।

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेवच॥

इत्यनेन तेनैव क्षत्रियादीनामप्यभिवादकानामभिवाद्यकर्तृका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामयादिप्रश्नविधानात्। नामधेयस्येति। ये केचिदविद्वांसो नामधेयस्य पूर्वोक्तसंस्कृतेनोच्चारितस्याभिवादमेतेन वयमभिवादिता इत्येवं रूपमर्थं न जानते तान्, अभिज्ञा अपि नारीश्च प्रति स्वनाम हित्वा ऽभिवादयेऽहमित्येव ब्रूयात्तदपि चेन्नावबुध्यन्ते तदा लौकिकेनापभ्रंशेनाप्यभिवाद्या इति द्योतयितुं प्राज्ञग्रहणम्। आभिवादनं विहितशब्देन नमस्कार इति वृद्धाः। पादसंग्रहणं चाभिवादनाद्भिन्नम्।

व्यत्यस्तपाणिना कार्यमित्यादिना

विप्रोष्य पादग्रहणमन्वहं चाभिवादनम्।

इत्यनेन च तस्य मनुना पृथगभिधानात्। एतदभिप्रायेण कल्पतरुणा 'अथाभिवादनोपसंग्रहणे' इति द्विवचनेन प्रकरणमुपक्रान्तम्। हरिहरोऽपि गुरुषु पादोपसंग्रहणं, वृद्धतरेषु अभिवादनं, वृद्धेषु च नमस्कारं कुर्यादिति भेदमाह। भोःशब्दमिति। अभिवादने यन्नाम प्रयुक्तं तस्यान्तेऽभिवाद्यसम्बोधनार्थं भोःशब्दं कीर्तयेत्। यतो नाम्नामभिवाद्यनाम्नां स्वरूपभावः स्वरूपसत्ता भोभावो भोइत्यस्य शब्दस्य स्वरूपम् ऋषिभिः स्मृतः। तेनाभिवाद्यनामानुच्चारणेऽपि भोःशब्देनैव तत्संबोधनमुक्तं भवति। एवंचाभिवादयेऽमुकनामाहमस्मि भोः इत्येवाभिवादनवाक्यम्। कुल्लूकभट्टस्तु स्वनाम प्रोच्याहमयमस्मीति अभिवाद इति गौतमवाक्ये नामपदोच्चारणस्य कर्त्तव्यतयाऽप्रतीतेर्नामपदोच्चारणं नेच्छति। मेधातिथिस्तु अहमस्मीत्यनयोः समानार्थतया एकतरप्रयोगमेव मन्यते। अत एव गौतमवाक्येऽहमित्येव श्रूयते। तदुभयमपि

असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्।

इति मनूक्ताभिवादनवाक्यविरोधादुपेक्षितम्। भवामीत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थेऽपि अस्मीत्यस्य क्रियापदरूपस्य साधुतया न वैयर्थ्यम् । आयुष्मानिति । अभिवादने कृते प्रत्यभिवादयित्रा अभिवादको विप्रादिः आयुष्मान् भव सौम्येति वाच्यः । अत्र सौम्यपदं देवदत्तादिपदवदभिवादकतत्तन्नामपरम् । अत एव द्वितीयार्द्धे प्रक्रान्तवाचिना अस्येत्यनेनाभिवादकनामानुवादेन तदन्तिमस्वरे प्लुतत्वं विधीयते । अन्यथा नामोच्चारणप्रापकविध्यन्तरकल्पनं प्रसज्येत । एतेनायुष्मान् भव सौम्यामुकेति प्रत्यभिवादनवाक्यरचनं यत् केषांचित्तत्परास्तम् । अकारश्चेति । अस्याभिवादकनाम्नोऽन्ते योऽकारः स प्लुत उच्चारणीयः । अकारपदमत्र स्वरमात्रोपलक्षणम् । नाम्नामदन्तत्वानियमाभावात् । अन्तत्वं च स्वरापेक्षम् । तच्च व्यञ्जनान्तेऽपि नाम्नि संभवति।अत एव पाणिनिरपि प्रत्यभिवादेऽशूद्रे टेः प्लुतिं स्मरति । टिशब्देन च योऽन्त्योऽच् तदादिशब्दरूपमुच्यते । पूर्वाक्षर इति । अक्षरमत्र व्यञ्जनम् । तेन पूर्वमव्यहितपूर्वमक्षरं व्यञ्जनं यस्येत्यर्थः । तथाच यस्यान्त्यस्वरस्याव्यवहितपूर्वं व्यञ्जनं तिष्ठति स ततो विश्लिष्य प्लुतो नोच्चार्य्यः । किंतु तद्व्यञ्जनसंबद्ध एवेति सिद्धम्। प्लुतश्च त्रिमात्रस्य संज्ञा । इयं च व्याख्या मेधातिथ्याद्यनेकानुसारिणी ।

हरदत्तस्तु पूर्वाक्षरप्लुत इति मध्यमविसर्गरहितं पाठं पठित्वाऽस्य नाम्नोऽन्ते पूर्वाक्षरप्लुतो नामाक्षरेभ्योऽधिकोऽकारो वाच्यः। पूर्वाक्षरप्लुत इत्यकारस्य विशेषणम् । यस्मात्पूर्वमक्षरं प्लुतरूपं स तथोक्तः। अक्षरमित्यचोऽभिधानम्। अकारात्पूर्वो योऽच् स प्लुतो वाच्यः । तेन व्यञ्जनव्यवधानेऽपि भवति । तत्राव्यञ्जनव्यवधाने यथा ऽऽयुष्मान् भव सौम्य हरदत्ता ३ अ, व्यञ्जनव्यवधाने यथा आयुष्मान् भव सौम्य अग्निची ३ द इति प्रयोग इति व्याख्यातवान् । अत्र विप्रपदं क्षत्रियादीनामप्युपलक्षणम् । क्षत्रियवैश्यौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रति प्रत्यभिवादनवाक्येऽन्तिमस्वरप्लुतत्वविकल्पस्य स्त्रीशूद्रौ प्रति प्रत्यभिवादनवाक्ये चान्त्यस्वरप्लुतत्वनिषेधस्य व्याकरणेऽभिधानात् । तेनैवं प्रत्यभिवादनवाक्यम्, आयुष्मान् भव देवदत्ता३इति । व्यञ्जनान्तस्य तु आयुष्मान् भव सोमशर्मा३न् इति । अत्रायुष्मान् भव सौम्येतीतिशब्दः प्रकारे । तेनायुष्मानेधि दीर्घायुर्भूयाश्चिरं जीवेत्येवमादिशब्दपरिग्रहः शिष्टाचारप्रसिद्धः सिद्धो भवतीति मेधातिथिः । यो न वेत्तीति । योऽभिवादनस्यानुरूपं प्रत्यभिवादनं न जानाति स नाभिवाद्यः । अभिवादनानुरूपं प्रत्यभिवादनं च यन्नाम्नाऽभिवादनं क्रियते तन्नामान्त्यस्वरप्लुतिरूपम् । अत्र निषेधोऽपि नामग्रहणपूर्वकाभिवादनस्यैव । नामधेयस्येत्यादिना पूर्ववचनेन अहं भो इति शब्देन तस्यापि संमाननीयत्वस्योक्तत्वात् । अत एव यथा शूद्र इति दृष्टान्तोऽपि संगच्छते । तस्यापि नवतिवर्षोत्तरं शूद्रोऽपि दशमीं गत इत्यनेन मानार्हत्वस्य वक्ष्यमाणत्वात् । प्रत्यभिवादनं चाभिवादितेन गुर्वादिना विहितशब्देनाशीर्वचनमिति ।

अभिवादयेदिति वाक्यशेषे वसिष्ठः, यो विद्यादभिवदितुमयमहं भो इति ब्रूयाद्यश्च न विद्यात्प्रत्यभिवादनमामन्त्रिते स्वरोऽन्त्योऽस्य प्लवते संध्यक्षरमप्रगृह्यमायावभावं च यथा भोभाविती इति । अस्यार्थः । यो विद्यादभिवदितुमिति । अभिवादने कृते प्रत्यभिवादनं कर्तुं यो जानीयात्तं स्वनामविशेषग्रहणेनाभिवादयेत् । अयमहं भो इति । यस्तु न जानीयात्प्रत्यभिवादनं तं प्रत्ययमहं भो इत्येव ब्रूयादित्यर्थः । चकारात् स्त्रियश्च । नामधेयस्येत्यादिपूर्वलिखितमनुवचनैकवाक्यत्वात् । प्रत्यभिवादनवाक्ये अभिवादकनामोच्चारणे विशेषमाह । आमन्त्रिते इत्यादि । आमन्त्रिते संबोधनप्रथमान्ते । अस्यनाम्नोऽन्त्यः स्वरः प्लवते त्रिमात्रः कार्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रगृह्यं प्रगृह्यसंज्ञारहितं यत्संध्यक्षरम् एकारादिचतुष्टयं तद् आईभावम् आऊभावं चकारात्प्लुतिं च, प्रपद्यतइति शेषः। तत्र च स्थानेऽन्तरतम इति न्यायात्कण्ठ्यतालव्ययोरेकारैकारयोः कण्ठ्यतालव्यरूप आईभावः। कण्ठ्यौष्ठ्ययोरोकारौकारयोः कण्ठ्यौष्ठ्यरूप आऊभावः। उदाहरणमाह यथा भो भावितीति। आमन्त्रितभोःशब्दस्यौकारस्याप्रगृह्यस्याउभावे कृते भाउपदं निष्पन्नं भवति। इतिशब्दः प्रकारे। यथा आमन्त्रितस्य गङ्गे इत्यस्य गङ्गाइ, तथा आमन्त्रितस्य पटो इत्यस्य पटाउ। प्रगृह्ये तु न भवाति। यथोभयामन्त्रणे गङ्गायमुने इत्यत्र।

आपस्तम्बः, दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयेतोरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्राञ्जलिः, प्लावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वर्णानाम्।

अत्र बाहुपदं पाणिपरम्। तत्प्रसारणं च शिरःसंयोगार्थम्। तेन ब्राह्मणस्य कर्णपर्यन्तं शिरसो नमनं, क्षत्रियस्य हृदयपर्यन्तं, वैश्यस्य नाभिपर्यन्तं, शूद्रस्य ऊर्वादिपादपर्यन्तमिति गम्यते। उरो वक्षः। मध्यं नाभ्युपलक्षितो देशः। नीचैरिति नीचैस्त्वं मध्यापेक्षया। प्राञ्जलिरिति सर्वान्वयि। प्लावनं प्लुतिकरणम्। नाम्नो नाम्नोऽन्त्यस्वरस्येत्यर्थः। अभिवादनस्य प्रत्यभिवादने अभिवादनोत्तरं क्रियमाणे प्रत्यभिवादने इत्यर्थः। अभिवादने इति सप्तम्यन्तपाठेऽप्ययमेवार्थः। अभिवादने व्याकरणे स्मृतौ वा कुत्रापि प्लुतत्वास्मरणात्। चकारस्त्वनर्थकः। एवमेव तद्भाष्ये हरदत्तोऽपि। पूर्वेषां शूद्रात्पूर्वेषां वर्णानाम्।

ब्राह्मणादीनामभिवादकानां प्रकारान्तरमाहाश्वलायनः,

वामं वामेन संस्पृश्य दक्षिणेन तु दक्षिणम्।
हस्तेन कर्णहस्ताभ्यां गुरूणामभिवादनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वामोपरि करं कृत्वा दक्षिणं नाम चोच्चरेत्।
जानुप्रभृतिपादान्तमारभ्य पद्योर्नमेत्॥

अथोपसंग्रहणविधिः॥

तत्र मनुः,

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः॥

व्यत्यस्तपाणिना विपरीतस्थापितसव्यदक्षिणपाणिना। सव्यो दक्षिणश्च प्रकरणात्पादः। तथा च सव्येन पाणिना गुरोः सव्यः पादः स्प्रष्टव्यो दक्षिणेन च दक्षिणः पाद इत्यर्थः।

गुर्वधिकारे पैठीनसिः, उत्तानाभ्यां हस्ताभ्यां दक्षिणेन दक्षिणं सव्यं सव्येन पादावभिवादयेत्। दक्षिणोपरिभावेन व्यत्यासोऽयं शिष्टसमाचारात्। अत्र गुरोर्व्यस्तपादत्वे पाणिव्यत्यासो न कार्यः। पाणिव्यत्यासस्य दृष्टार्थत्वादिति वदन्ति।

बौधायनः, दक्षिणं दक्षिणेन सव्यं सव्येन चोपसंग्रहणं दीर्घमायुः स्वर्गं चेप्सतः काममन्यस्मै साधुवृत्ताय गुरुणानुज्ञातोऽसावहं भो इति श्रोत्रे संस्पृश्य मनःसमाधानार्थमधस्ताज्जान्वोरापद्भ्यामिति। दक्षिणं गुरोर्दक्षिणं पादं दक्षिणेन स्वदक्षिणपाणिना। एवं सव्यं सव्येनेत्यत्रापि बोध्यम्। मनःसमाधानार्थम् अभिवाद्यावधानार्थम्। अधस्ताज्जान्वोरापद्भ्यामिति। जानुनी आरभ्य पादपर्यन्तामित्यर्थः। स्पृशेदिति शेषः। अधस्तादित्यादिकं दक्षिणं दक्षिणेन सव्यं सव्येनेत्यनेनान्वयि। तथाचैवं यत्स्पृशेत्तदुपस्पर्शनमित्यर्थः।

आपस्तम्बः, उदितआदित्ये आचार्येण समेत्योपसंग्रहणं सदैवाभिवादनम् उपसंग्राह्य आचार्य इत्येके। दक्षिणेन पाणिना दक्षिणं पादमधस्तादध्यभिमृश्य सकुष्ठिकमुपसंगृह्णीयादुभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यामेवोभावपि पीडयत उपसंग्राह्याविस्येके । सदैवेति । अन्यदा सर्वदाऽभिवादनमेव न तूपसंग्रहणम् । अन्यदाऽप्याचार्यस्योपसंग्रहणं कार्यमित्येकेषां मतमाह।उपसंग्राह्य इत्यादि।उपसंग्रहणप्रकारमाह।दक्षिणेनेत्यादि । अध्यभिमृश्येति।अधिशब्द उपरिष्टादित्यर्थे।तेनाधस्तादुपरिष्टाच्चाभिमृश्येत्यर्थः।सकुष्ठिकं सगुल्फम्।साङ्गुष्ठमित्यन्यइति हरदत्तः।उपसंगृह्णीयात् उक्तमुपसंग्रहणं कुर्यादित्यर्थः । अन्येषां मतमाह । उभाभ्यामिति । उभाभ्यां पाणिभ्यामाचार्यस्योभावपि पादौ पीडयत एव माणवकादेः उभावपि पादावुपसंग्राह्यावित्यर्थः । पीडयत इति कृत्यानां कर्त्तरि वेति षष्ठी ।

वसिष्ठः, गुरोः पादोपसंग्रहणं कार्यम् ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवादयेत् ये चैव पादग्राह्यास्तेषां च भार्या गुरोश्च मातापितराविति । ऋत्विगादीन् कनिष्ठान् ये च पादग्राह्याः पादोपसंग्रहणयोग्याः पूर्वोक्तेभ्योऽन्ये स्मृत्यन्तरोक्तास्तानपि कनिष्ठान् तेषां भार्या गुरोश्च मातापितरौ च प्रत्युत्थायाभिवादयेत् । अभिवादनं चात्र संभाषणम् । मनुबौधायनाभ्यां तथाऽभिधानात् ।

तथाह मनुः,

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।
असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ॥

गुरूनिति ज्ञानशब्दोऽत्र ज्ञानज्येष्ठादिपरः । भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकथनात् ।

बौधायनः, ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानाभिभाषणमिति । न च संभाषणाभिवादनयोः समुच्चय एवास्त्विति वाच्यम् । गौतमेनाभिवादननिषेधात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाह गौतमः, ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानमनभिवाद्या इति । ऋत्विगादीनामात्मनो यवीयसां प्रत्युत्थानमात्रेण पूजा कार्या न पुनस्तेऽभिवाद्या इति हरदत्तः । कल्पतरुमाधवाचार्यावप्येवम् । अन्ये तु अभिवादनसंभाषणयोर्द्वयोरपि स्मरणाज्ज्ञानज्येष्ठानां ससंभाषणमभिवादनमन्येषामभिवादनमात्रमिति वदन्ति ।

आपस्तम्बः,

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवादयेत्तूष्णीं वोपगृह्णीयादिति । अभिवादयेत् अभिभाषेत । उपगृह्णीयात् उप समीपे गृह्णीयादङ्कपाल्यादिनेति कल्पतरुः ।

गौतमः,

गुरोः पादोपग्रहणं प्रातरिति ।

गुर्वधिकारे पैठीनसिः,

उभाभ्यां हस्ताभ्यां दक्षिणेन दक्षिणं सव्यं सव्येन पादावभिवादयेत् ।

आपस्तम्बः,

गुरोस्तिष्ठन् प्रातरभिवादनमभिवादयेदसावहं भो इति । समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक् प्रातराशात्प्रोष्य च समागमे स्वर्गमायुश्चेप्सन् । अभिवादयेत् कुर्यात् । प्रातराशात् प्रातर्भोजनात् ।

गौतमः,

पादोपसंग्रहणं समवायेऽन्वहमभिगम्य तु विप्रोष्य मातृपितृतत्सबन्धूनां पूर्वजानां विद्यागुरूणां च सन्निपाते परस्येति । वक्ष्यमाणानां मात्रादीनां समवाये संगमे प्रतिदिनं पादोपसंग्रहणं कार्यम् । अभिगम्येति । विप्रोष्य स्वयं विप्रवासं कृत्वा तेषां विप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासे वा ते मातृपित्रादयो यत्र स्थितास्तत्राभिगम्य पादोपसं-ग्रहणं कार्यम् । तत्सबन्धूनामिति । मातृपितृसमानजातीयबन्धूनां मातुलमातामहपितृव्यपितामहप्रभृतीनामित्यर्थ इति कल्पतरुः । हरदत्तस्तु तद्बन्धूनामिति पठित्वा तद्बन्धवो मातुलमातृष्वसृपितृव्यपितृष्वस्रादय इति व्याख्यातवान् । पूर्वजानां ज्येष्ठभ्रातॄणाम्, विद्यागुरूणाम् आचार्योपाध्यायादीनाम्, तद्गुरूणाम् आचार्यादीनां सन्निपाते पूर्वोक्तानां मात्रादीनां युगपदेकत्रावस्थाने परस्योत्कृष्टस्य प्रथममुपसंग्रहणं कार्यमित्यर्थः । गुरूणां तारतम्यं चाग्रे वक्ष्यते ।

तथा, नाविप्रोष्य स्त्रीणाममातृपितृव्यभार्याभगिनीनामिति । प्रागुक्तस्य "पादोपसंग्रहणं समवाये ऽन्वह"मित्यस्यापवादोऽयम् । मात्रादीनां त्वविप्रोष्यापि प्रत्यहं पादोपसंग्रहणं कार्यम्, तद्व्यतिरिक्तानां तु विप्रोष्यैव ।

स्मृत्यन्तरमपि,

उपसंग्रहणं कुर्याद्भगिन्या मातुरेवच ।
तथा पितृव्यभार्याणां समवाये ऽन्वहं द्विजः ॥

तथा, नोपसंग्रहणं भ्रातृभार्याणां श्वश्र्वाश्चेति । विप्रोष्य प्रत्यागतेनाप्यासामुपसंग्रहणं न कार्यम् । अत्र भ्रातृभार्या असवर्णा ज्ञातव्या ।

भ्रातृभार्योपसंग्राह्या सवर्णाऽहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धयोषितः ॥

इति मनुना सवर्णाया उपसंगृहणस्याभिहितत्वात् । अत्र श्वश्र्वा उपसंगृहणनिषेधो युवतिश्वश्रूपरः ।

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ।
संपूज्या गुरुपत्नीवत्समास्ता गुरुभार्यया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मनुना श्वश्र्वा गुरुपत्नीतुल्यत्वाभिधानेन तस्या उपसंग्रहणस्यानुमतत्वात्। युवत्याश्च गुरुपत्न्याः पादोपसंग्रहणनिषेधो मनुनैव दर्शितः।

यथा,

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः। इति।

पितृभगिन्यादीनामपि उपसंग्रहणं कार्यं, भ्रातृभार्योपसंग्रहणमुक्त्वा तासामपि मनुना मातृतुल्यत्वाभिधानेनोपसंग्रहणस्यानुमतत्वात्।

यथा,

पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि।

मातृवद् वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी॥ इति।

प्रत्युत्थेया नाभिवाद्या इत्यनुवृत्तौ पुनर्गौतमः, तथाऽन्यः पूर्वः पौरोऽशीतिकावरः शूद्रो ऽप्यपत्यसमेनेति। यथा ऋत्विक्श्वशुरेत्यादिपूर्वसूत्रोक्ता यवीयस ऋत्विगादयः प्रत्युत्थेया नाभिवाद्यास्तथाऽयमपि। अन्यः अनन्तरसूत्रोक्तेभ्य ऋत्विगादिभ्योऽन्यः। पूर्वो वयसाऽधिकः। पौरः समानपुरवासी। अशीतिकावरः। अशीतिरेवाशीतिका सा अवरा अवधित्वेन यस्य स तथेत्यर्थः। एवं भूतः शूद्रोऽप्यपत्यसमेन ब्राह्मणादिना प्रत्युत्थेयो नाभिवाद्य इत्यर्थः। अपत्यसमेनेत्यनेन तस्य यवीयस्ता दर्शिता। कल्पतरुस्तु शूद्रो यदि पितृसखो भवति सख्युः पिता वा भवति तदाऽपत्यसमेन ब्राह्मणेन प्रत्युत्थेय इत्यर्थ इत्याह। अत्र शूद्रग्रहणमवरवर्णोपलक्षणम्। ततश्च शूद्रस्त्रिभिरपि वर्णैर्वैश्यो द्वाभ्यां क्षत्रियो ब्राह्मणेनैवेति सिध्यति। ब्राह्मणादिस्तु पूर्वोक्तगुणविशिष्टः क्षत्रियादिना प्रत्युत्थेयो नाभिवाद्यः।

यदाह स एव,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवरोऽप्यार्यः शूद्रेणेति । अवरो यवीयान् आर्यस्त्रैवर्णिकः शूद्रेण पूर्वोक्ताशीतिकावरत्वादिगुणविशिष्टेन, प्रत्युत्थेयो नाभिवाद्य इत्यनुषङ्गः । अत्रापि शूद्रग्रहणमवरवर्णोपलक्षणार्थम् । ततश्च शूद्रेण त्रयो वर्णा वैश्येन द्वौ क्षत्रियेणैक इति यवीयांसः प्रत्युत्थेया नाभिवाद्या इति सिध्यति ।

सांख्यायनगृह्यम्,

अहरहराचार्यायाभिवादयेद् गुरुभ्यश्च, समेत्य श्रोत्रियस्य, प्रोष्य प्रत्येत्याश्रोत्रियस्य समेत्य दैववशात्समागमे । अश्रोत्रियस्य तु प्रोष्य प्रत्येत्य न तु दैववशात्समागमेऽपीत्यर्थः ।

पैठीनसिः,

लौकिकं वैदिकं वाऽपि यच्चान्यद्धर्मसंहितम् ।
यतो विद्यागमं कुर्यात्तं पूर्वमभिवादयेत् ॥
धर्मसंहितं धर्मसंबद्धं, विद्यागमं विद्याग्रहणम् ।

मनुः,

लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥
सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ॥
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ।
शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् ॥
ऊर्ध्वं प्राणाह्युत्क्रामन्ति यूनः स्थविरआयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि सम्यक् वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥ इति ।
लौकिकम् अर्थशास्त्रीयादि । आध्यात्मिकं ब्रह्मप्रतिपादक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्रीयादि । पूर्वं बहुमान्यसमवाये प्रथमम् । एतेषां समवाये यथोत्तरं मान्यत्वम् । वरं मनाक्प्रियः ।

देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ।

इत्यमरकोषात् । सुयन्त्रितः शास्त्रनियन्त्रितात्मा । सर्वाशी सर्वविक्रयीति निषिद्धक्रियाशीलोपलक्षणम् । शय्येति । शय्या चासनं चेति शय्यासनं, जातिरप्राणिनामिति द्वन्द्वैकवद्भावः, तस्मिन् । श्रेयसा विद्याद्यधिकेन गुर्वादिना वा ऽध्याचरिते असाधारण्येनाङ्गीकृते । न समाविशेत् नासीत । अध्याचरिते इति विशेषणसामर्थ्यात्तदङ्गीकारकालपर्यन्तं निषेधोऽयम् । स्वयं शय्यासनस्थश्चेत् श्रेयसि समागते प्रत्युत्थायाभिवादनं कुर्यात् । अनेन च वचनेन प्रत्युत्थानमात्रं विहितम् ।

यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ।

इत्यनेन पुनरासनादित्यागो विधास्यते इत्यर्थभेदादेवापौनरुक्त्यम् । मेधातिथिस्तु अगुरुविषयमिदं वाक्यं, यानासनस्थ इत्यादिवक्ष्यमाणं तु गुरुविषयमित्याह । अत्रार्थवादमाह । ऊर्ध्वमिति । उत्क्रामन्ति देहाद् बहिर्गन्तुमुद्यता भवन्ति । आयति आगच्छति । तान् प्राणान् ।

भविष्यपुराणे,

अभीति भगवान् विष्णुर्वादयामीति शंकरः ।
द्वावेतौ पूजितौ तेन यः करोत्यभिवादनम् ॥

गुर्वधिकारे मनुः,

दूरस्थो नाश्रयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह ।
असंश्रवे चैव गुरोर्न किंचिदपि कीर्त्तयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥
गुरोर्गुरौ सन्निहिते गुरुवद् वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि ॥
श्रेयःसु गुरुवद् वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्याद् गुरुपुत्रस्य पादयोश्चावनेजनम् ॥
गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेवच ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥
कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्॥ इति ।

प्रतिवाते इति । गुरुदेशाद्यत्र वायुरायाति स प्रतिवातः । स्वदेशाद्यत्र वायुर्गच्छति सोऽनुवातः । तत्रोभयत्रापि गुरुणा सह नोपविशेत्। असंश्रवइति । यत्रोक्ते सति गुरुर्न शृणोति तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थित्वा गुरुमुद्दिश्य न किंचिदपि ब्रूयादित्यर्थः। फलकं काष्ठनिर्मितं दीर्घासनम्। अनिसृष्टोऽनियुक्तः। स्वान् गुरून् पितृव्यादीन्। विद्यागुरवः आचार्यव्यतिरिक्ता उपाध्यायाः। नित्या सार्वकालिकी। स्वयोनिषु पितृव्यादिषु। हितं धर्मतत्त्वम्। श्रेयःसु विद्यादिश्रेष्ठेषु। आर्येषु ज्येष्ठेषु। गुरुस्वबन्धवो गुरुपितृव्यादयः। अध्यापयन् अध्यापनसमर्थः। यज्ञकर्मणि गुरुवन्मानमर्हतीत्यन्वयः। गुरुवत्सर्वपूजायां प्राप्तायामपवादमाह। उत्सादनमित्यादि। गात्रोत्सादनं गात्रोद्वर्त्तनम्। पूर्णविंशतिवर्षेणेति यौवनोपलक्षणम्। अत एवाग्रिमश्लोके युवेति वक्ष्यति।

शातातपः,

अभिवाद्यो नमस्कार्यश्शिरसा वन्द्य एवच।
ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा॥
नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथंचन।
ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः॥
ब्राह्मणः सर्ववर्णानां स्वस्ति कुर्यादिति श्रुतिः।
सवर्णैस्तु सवर्णानां कार्यमेवाभिवादनम्॥
अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत्।
ब्राह्मणानां शतं सम्यगभिवाद्य विशुद्ध्यति॥ इति।

स्वस्ति कुर्यादिति। आशिषं कुर्यादित्यर्थः। स्वस्त्याशीःक्षेमपुण्यादाविति कोषात्। अत्र ब्राह्मणपदं उत्तमोपलक्षणम्। सर्ववर्णपदं हीनपरम्। सवर्णैः अपकृष्टैः। सवर्णानाम् उत्कृष्टानाम्।

पठन्ति च

यदि विप्रः प्रमादेन शूद्रमप्यभिवादयेत्।
प्रणम्य दश विप्रांस्तु ततः पापात्प्रमुच्यते॥
अप्रणामगते शूद्रे स्वस्ति कुर्वन्ति ये द्विजाः।
शूद्रोऽपि नरकं याति ब्राह्मणस्तदनन्तरम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवीपुराणे,

शूद्रोऽपिचाधिकाराढ्यो वादाक्षरसुगर्वितः ।
महापातकतुल्यं तु लभते विनयादृते ॥ वादस्तर्कः ।

हारीतः,

नान्येन कृतप्रणामोऽन्यमभिभाषेताभिभाषेत गुरून् ब्राह्मणांश्च न प्रागाहारादू वृषलान् इति । अन्यं प्रणामकर्त्तुः ।

आपस्तम्बः। विषमगताय गुरवे नाभिवाद्यम्, अन्वारुह्याभिवादयेत्। तथा अप्रयतेन नाभिवाद्यम्।तथा,अप्रयताय।अप्रयतश्च न प्रत्यभिवादयेत्।प्रतिवयसः स्त्रियश्च। तथा,सोपानद्वेष्टितशिरा अवहितपाणिर्नाभिवादयेदिति। विषमगताय उच्चस्थानगताय नीचस्थानगताय वा । अन्वारुह्य आरुह्य अवरुह्यवा । प्रतिवयसः अनधिकवयसः । सोपानदादिषु त्रिष्वपि नकारः संबध्यते । अवहितपाणिः । वस्त्वन्तरासक्तपाणिः ।

गौतमः, सोपानत्कश्चासनाभिवादननमस्कारान् वर्जयेत्। आसनम् उपवेशनम् । कैश्चित्तु अन्ननमिति पठित्वा भोजनमिति व्याख्यातम्। नमस्कारोऽभिवादनाद्भिन्नो देवब्राह्मणाद्युद्देश्यकः।

शङ्खलिखितौ, नोदकुम्भहस्तोऽभिवादयेन्न भैक्ष्यं चरन्न पुष्पादिपाणिर्नाशुचिर्न जपन्न देवपितृकार्यं कुर्वन्न परिषन्मध्ये स्वैरवाक् । स्वैरवाक् मन्दवाक् ।

विष्णुः,

सभासु चैव सर्वासु यज्ञे राजगृहेषु च ।
नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत् ॥

बौधायनः, समिद्धार्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यच्चान्यदप्येवंयुक्तं न समवाये इति। समिद्धारी समिधो वहन् इति कल्पतरुः । पारिजाते तु समिद्धारीति पठित्वा समिद्धार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वान् इति व्याख्यातम् । एवंयुक्तं समिदादियुक्तं, तन्नाभिवादये- दित्यर्थः । यच्चान्यदिति सामान्ये नपुंसकम् । समवाये परिषदि ।

लघुहारीतः,

जपयज्ञजलस्थश्च समित्पुष्पकुशानलान् ।
उदकुम्भं च भैक्ष्यं च वहन्तं नाभिवादयेत् ॥
कुशपुष्पसमिद्वारिमृदन्नकृतपाणिकः ।
जपहोमौ च कुर्वाणो नाभिवाद्यः कथंचन ॥

यमः,

अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति ।
यद्दुष्कृतं भवेदस्य तस्माद्भागं प्रपद्यते ॥
तस्मात्पूर्वाभिभाषी स्याच्चाण्डालस्यापि धर्मवित् ।
सुरां पिबेति वक्तव्यमेवं धर्मो न हीयते ॥
स्वस्तीति ब्राह्मणे ब्रूयादायुष्यमिति राजनि ।
वर्द्धतामिति वैश्ये तु शूद्रे त्वारोग्यमेवच ॥
यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितम् ।
यस्मिन् सर्वे स्थिताः कामाः सा स्वस्तीत्यभिसंज्ञिता॥इति।

अभिवादे, कृते सति । पूर्वं प्रथमत एव ।
अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति ।
इत्याशिषः प्रस्तुतत्वात् । सा आशीः स्वस्तीत्यभिसंज्ञितेति संबन्धः ।

मनुयमौ,

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेवच ॥

आपस्तम्बः, कुशलमवरवयसं वयस्यं वा पृच्छेदनामयं क्षत्रियं प्रनष्टं वैश्यमारोग्यं शूद्रं, नासंभाष्य श्रोत्रियमभिव्रजेदरण्ये च

५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रियमिति। श्रोत्रियो वेदाध्यायी तदर्थानुष्ठाता च। अरण्ये स्त्रियं भयादिनिवृत्त्यर्थम्।

यमः,

क्षत्रियस्त्रियुगं हन्ति वैश्यो हन्ति चतुर्युगम्।
हन्त्येकसप्ततियुगं शूद्रो ब्राह्मणमब्रुवन्॥

युगं जन्म। अब्रुवन् अवज्ञया ऽसंभाषमाणः।

आपस्तम्बः,

त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति।

मनुः,

दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम्।
अब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु॥

सख्यमिति मान्यताव्यावृत्त्यर्थम्।

दशभिरब्दैराख्यायते इति दशाब्दाख्यम्। अयमर्थः। एकपुरवासिनामधिकतरविद्यादिगुणरहितानां दशाब्दपर्यन्तं ज्येष्ठत्वे सत्यपि सखेत्येवमाख्यायते न त्वभिवाद्यः। पुरग्रहणं प्रदर्शनार्थं, तेनैकग्रामादिवासेऽप्येवं भवति। गीतादिकलाभिज्ञानां पञ्चवर्षपर्यन्तं, श्रोत्रियाणाम् अब्दपर्यन्तं, सपिण्डेष्वत्यन्ताल्पेनैव कालेन ज्येष्ठत्वे सति सख्यम्। अपिरेवार्थे। सर्वत्र उक्तकालादूर्ध्वं ज्येष्ठव्यवहारः।

तथा,

अवाच्यो दीक्षितो नाम्ना यवीयानापि यो भवेत्।
भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित्॥

अस्यार्थः। प्रत्याभिवादनकाले अन्यदा च दीक्षणीयाप्रभृति अवभृथस्नानात्पूर्वं कनिष्ठोऽपि दीक्षितो नाम्ना न वाच्यः। किंतु भोभवच्छब्दपूर्वकं दीक्षितादिशब्दैरभिभाषेत। यथा भो दीक्षितेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा,

परपत्नी तु या स्त्रीस्यादसंबद्धा च योनितः।
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीतिच ॥

विष्णुः,

जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत्।
सर्वं तन्निष्फलं याति ह्येकहस्ताभिवादनात् ॥ इति।

माधवीये श्लोकापस्तम्बः,

समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकः।
जपं होमं च कुर्वाणो नाभिवाद्यस्तथा द्विजः ॥

अन्यान्यपि वचनानि तत्रैव,

पाखण्डं पतितं व्रात्यं महापातकिनं शठम्।
नास्तिकं च कृतघ्नं च नाभिवादेत्कथंचन ॥
धावन्तं च प्रमत्तं च मूत्रोच्चारकृतं तथा।
भुञ्जानमातुरं नार्हं नाभिवादेद्द्विजोत्तमः ॥
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम्।
अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादयेत् ॥
स्रुक्पाणिकमनाज्ञातमशक्तं रिपुमातुरम्।
योगिनं च तपःसक्तं कनिष्ठं नाभिवादयेत् ॥

तत्रैव शातातपः,

उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम्।
अभिवाद्य द्विजो मोहादहोरात्रेण शुध्यति ॥ इति।
एतदनन्तरं निबन्धान्तरे वचनानि दृश्यन्ते ॥

यथा,

क्षत्रवैश्याभिवादे च विप्रस्यैवं विधीयते।
शूद्राभिवादने कार्यं त्रिरात्रं तु द्विजातिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रजकादिषु चान्द्रं स्यादिति संग्रहकृन्मतम् ।
देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम् ॥
नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ।
सर्वे चापि नमस्कार्याः सर्वावस्थाश्च सर्वदा ॥

त्रिदण्डिनमिति यतिमात्रोपलक्षणम् । सर्वेचापीति । अशुच्यवस्थास्थिता अपि नमस्कार्या भवन्ति । अभिवादनं परं तदवस्थायां निषिद्धमित्यर्थः ॥

मात्स्ये,

पतिता गुरवस्त्याज्या माता चैव कथंचन ।
गर्भधारणपोषाभ्यां तेभ्यो माता गरीयसी ॥

पतिताया भार्याया गृहवासपरिपोषणविधानं स्त्रीस्वातन्त्र्यनिषेधमूलकतया सर्वस्त्रीधारणमिति स्थितौ वचनमिदं नमस्कारादिविषयमिति वदन्ति ।

पठन्ति च,

मातुः पितुः कनीयांसं न नमस्येद्वयोऽधिकः ।
नमस्येत्तु गुरोर्भार्यां भ्रातृजायां विमातरम् ॥

विद्याऽऽकरवाजपेयिधृतं वचनम्,

अजाकर्णेन विद्वांसं यतिं संपुटपाणिना ।
मूर्खं चैवैकहस्तेन कनिष्ठं नाभिवादयेत् ।

अत्र विद्वांसमित्यादावभिवादयेदित्यस्यान्वयः । एवं च पूर्वलिखितैकहस्ताभिवादनिषेधो मूर्खव्यतिरिक्तपरः । केचित्तु

ज्येष्ठो यदि नमः कुर्यात्कनिष्ठाय तयोः पुनः ।
जन्मप्रभृति यत्पुण्यमायुश्चैव प्रणश्यति ॥

इतिवचनं पठित्वा

ज्यायानपि कनीयांसं संध्याकालेऽभिवादयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विना पुत्रं च शिष्यं च तथैव दुहितुः पतिम् ॥

इति पठ्यमानवचनात्तस्य संध्याकालातिरिक्तकालविषयकत्वं वर्णयन्ति।

यत्तु,

प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम्।

इति भागवतवचनं तद्वैष्णवविषयम्।

माधवीये विष्णुपुराणे,

अभिवादे कृते यस्तु न करोत्यभिवादनम्।

आशिषं वा कुरुश्रेष्ठ स याति नरकान् बहून् ॥

अत्राशीर्नमस्कारयोर्हरिहरपद्धतिधृतवचनाद् व्यस्थितो विकल्पः।

यथा,

आशीर्वाच्या नमस्कार्यैर्वयस्यस्तु पुनर्नमेत्।

एवंच कनिष्ठो नमस्कृतोऽपि प्रतिनमस्कारमेव कुर्यान्नाशिषः।

तथा,

ज्येष्ठे कनिष्ठो यो मोहात्स्वस्तिवाचं करोति वै।

ज्येष्ठस्य हरते सर्वं दुष्कृतं यत्त्रिधा कृतम् ॥

स्वस्तिवाचम् आशीर्वचनम्। अयं च निषेधो नमस्कारानन्तरविहिताशीर्वचनविषयकः। आशीर्वादान्तरे शिष्टाविगानात्। पुत्रादिभिन्नकनिष्ठसवर्णेषु तूभयं विधेयं सदाचारादिति केचित्।

गौतमः,

भोभवन्निति वयस्यः समानेऽहनि जातः। अत्राहःशब्दः संवत्सरवाचक इति हरदत्तः। एकस्मिन् वत्सरे जातो यो वयस्यः स भोभवन्नित्यनयोरन्यतरेण शब्देन संभाष्यः। तथा दशवर्षवृद्धः पौरः, पञ्चभिः कलाधरः, श्रोत्रियश्चारणस्त्रिभिः। पौरः एकपुरवासी। कलाधरः कलाभिज्ञः। चारणः सहाध्यायी। एते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वे भोभवन्निति संभाष्याः नाभिवाद्याः । तथा राजन्यवैश्यकर्मविद्याहीनाः। कर्मशब्दः प्रत्येकमभिसंबध्यते । राजन्यकर्मा वैश्यकर्मा ब्राह्मणोऽपि राजन्यकर्मणा वैश्यकर्मणा वा जीवन्नसन्तद्वृद्धोऽपि भोभवन्नितिसंभाष्यो नाभिवाद्यः। विद्याहीनो वृद्धोऽपि विद्याधिकेन तथा संभाष्यो नाभिवाद्यः । तथा दीक्षितश्च प्राक् क्रयात्। वयस्यविषयमिदम् । दीक्षितश्च वयस्यः सोमक्रयात् प्राक् तथा संभाष्यः । ततः परं वृद्धवन्मान्यः ।

अथ मान्याः ।

तत्र शंखलिखितौ,

अथ मान्याः पिता माता पितुर्भार्या ज्येष्ठो भ्राता भगिनी ज्येष्ठः श्यालः पितुः सखा गुरुराचार्यः पितृव्यमातुलश्वश्रूश्वशुरवृद्धा इति । पितुर्भार्या विमाता ।

विष्णुः,

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥

राजर्त्विक् श्रोत्रियो ऽधर्मप्रतिषेध्युपाध्यायापितृव्यमातामहमातुलश्वशुरज्येष्ठभ्रातृसंबन्धिनस्त्वाचार्यवत्प्रतिपूजनीयाः पत्न्यश्च तेषां सवर्णाः मातृष्वसा ज्येष्ठा स्वसा चेति । अधर्मप्रतिषेधी । अधर्माद्यो निवारयति ।

हारीतः,

गुरुशुश्रूषा नाम ज्ञानधर्मार्थं निमित्तं क्रियते। तत्र ज्ञानानिष्क्रयार्थं गुरुशुश्रूषां कुर्यात्। दिविष्ठा भूमिष्ठाश्च खलु गुरवो, ऽग्न्यादयो देवा दिविष्ठास्तेषां जपहोमार्च्चनादिभिः शुश्रूषां कुर्यात् । भूमिष्ठाः खलु गुरवो यथा ब्राह्मणो मातापितरौ ज्येष्ठो भ्राता ज्येष्ठस्य पत्नी उपाध्याय उपाध्यायपत्नी दीक्षितः प्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जितो राजा वयोवृद्धो ज्ञानवृद्धस्तपोवृद्धश्चेति । तेषामभिगमनाभिवादनासनार्घातिथ्यादिभिः शुश्रूषां कुर्यात् । एवं ह्याह,

मूलं धर्मस्य गुरवो ज्ञानस्य तपसस्तथा ।
तस्माद्धि गुरवः सेव्याः पुरुषेण प्रयत्नतः ॥
भूमिष्ठा गुरवो येषां तुष्यन्ति सततं नृणाम् ।
देवा हि तेषां तुष्यन्ति नराणां पुण्यकर्मणाम् ॥
अतुष्टा गुरवो येषां प्रणष्टास्ते नराधमाः ।
तुष्टास्तु येषां गुरवस्तेषां सर्वाः समृद्धयः ॥
गुरुमन्युप्रदग्धानां न शुभा विद्यते गतिः । इति ।

दीक्षितः सोमक्रयादनन्तरम् । तत्पूर्वं तु दीक्षितश्च प्राक् क्रयादिति गौतमेन तस्य वयस्यत्वाभिधानात् । राजा चात्र महीपतिर्न तु क्षत्रियमात्रम् । देवलवचनैकवाक्यत्वात् ।

यथाऽऽदेवलः,

उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
माता मातामही गुर्वी पितुर्मातुश्च सोदराः ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियः ।
गुर्वी गुरुपत्नी । ज्येष्ठा, भगिनीति शेषः ।

तथा,

इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा ।
अनुवर्तनमेतेषां मनोवाक्कायकर्मभिः ॥
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ।
नैतैरुपाविशेत्सार्धं विवदेन्नात्मकारणात् ॥
उद्दिष्टं साधयेदर्थं प्रतिषिद्धं च वर्जयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्दिष्टमादिष्टम् । तथा,

तत्पूज्यान् पूजयेन्नित्यं व्यसने न परित्यजेत् ।
क्रोधं वाग्दण्डपारुष्ये उत्सेकं वैकृतान् स्वरान् ॥
नर्म हासं विलासं च वर्जयेद् गुरुसन्निधौ ।
जीवितार्थमपि द्वेषं गुरुभिर्नैव भावयेत् ॥
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः ।

व्यसने विपादि।उत्सेको गर्वः।नर्म क्रीडाम्। हासं परिहासम्। विलासं शृङ्गारचेष्टाम् ।

तथा,

गुरूणामपि सर्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठो भ्राता च भर्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजितव्या विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत्पिता च माता च द्वावेतौ निर्विकारिणौ ।
तावत्सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्मं प्राप्नुयान्नात्र संशयः ॥
नास्ति मातृसमं दैवं नास्ति पित्रा समो गुरुः ।
तयोः प्रत्युपकारो हि न कथंचन विद्यते ॥
सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चापद्यते दिवम् ॥

तेषां पञ्चानाम्।तेषां त्रयाणां मध्ये।तान् पञ्चाह । य इत्यादि। भावयति उत्पादयति । भर्त्ता पोषकः । वक्तारम् अध्यापकम् । विसृष्टः प्रस्थापितः । तथा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
तस्मात्पितृवदाराध्यो गुरुर्ज्येष्ठो हितार्थिभिः ।
तस्य प्रसादान्मर्त्यो हि प्रेत्य चेह च नन्दति ॥

पुंसा धर्मनिविष्टेन पूज्यो भर्त्ता हि सर्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामथाक्षयान् लोकान् प्रोवाच भगवान् मनुः ॥
यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥

योऽन्तर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥
तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
नैतैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥

तथा,
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥
यावत्त्रयस्ते जीवेयुस्तावन्नान्यत्समाचरेत् ।
तेषां नित्यं तु शुश्रूषां कुर्यात्प्रियहिते रतः ॥
तेषामनुपरोधेन पारक्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवाक्कायकर्मभिः ॥

त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते ।
एष धर्मः परस्तस्मादुपधर्मोऽन्य उच्यते ॥
विप्र इत्यनुवृत्तौ शातातपः,
अभिवाद्यो नमस्कार्यः पादयोर्वन्द्य एवच ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ।

भविष्यपुराणे प्रथमे मनुश्च,

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ।
पितापुत्रौ विजानीयाद् ब्राह्मणस्तु तयोः पिता ॥
इत्येवं क्षत्रियपिता वैश्यस्यापि पितामहः ।
प्रपितामहश्च शूद्रस्य प्रोक्तो विप्रो मनीषिभिः ॥

मनुर्विष्णुश्च,

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥

वित्तं न्यायार्जितं धनम् । बन्धुः पितृव्यादिः । वयो ऽधिकम् । कर्म श्रौतं स्मार्त्तं च । विद्या तत्त्वज्ञानम् । मान्यस्थानानि । मान्यत्वकारणानि ।

तथा,

पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥

त्रिषु वर्णेषु ब्राह्मणादिषु पञ्चानां पूर्वोक्तानां वित्तादीनां मध्ये यत्र पूर्वमप्यधिकं भवति स एवोत्तरस्मादपि मान्यः । तेन वित्तबन्धुयुक्तो वयोऽधिकान्मान्यः । वित्तादित्रययुक्तः कर्मवतो मान्यः । वित्तादिचतुष्टययुक्तो विदुषो मान्यः । गुणवन्ति प्रकर्षवन्ति । तेन द्वयोर्वित्तादिमत्त्वे प्रकर्षो मानहेतुः । प्रकर्षश्च वित्तस्य न्यायार्जितत्वादिः । बन्धोरन्तरङ्गत्वादिः । वयसः अत्याधिक्यादिः । कर्मणः सर्वाङ्गसंपन्नत्वादिः । विद्याया विधिवद्ग्रहणादिः । दशमीं नवत्यधिकावस्थाम् । शतवर्षाणां दशधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागे दशम्यवस्था नवत्यधिका भवति । एतादृशः शूद्रोऽपि द्विजानां मान्य इत्यर्थः ।

वसिष्ठः,

विद्या वित्तं वयः संबन्धाः कर्म च मान्यं तेषां समवाये पूर्वं पूर्वं गरीयः । संबन्धा बन्धवः ।

गौतमः,

वित्तबन्धुकर्मजातिविद्यावयांसि मान्यानि परबलीयांसि, श्रुतं तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्य श्रुतेश्चेति । जातिराभिजात्यं आधिक्यापादिका ब्राह्मणत्वादिर्वा । श्रुतं सार्थसाङ्गवेदाध्ययनम् । श्रुतेरविच्छिन्नवेदसंप्रदायस्य । अयमत्र निर्णयः । मनुना वित्तं सर्वजघन्यत्वेनोक्तं वसिष्ठेन तु विद्यामात्रात् । तत्र च वसिष्ठोक्तं वित्तोत्कृष्टत्वं न्यायार्जितधर्मोपयोगिवित्ताभिप्रायम् । एवंच मनुगौतमवसिष्ठेषु कर्मण उत्कृष्टत्वमध्यमत्वजघन्यत्वानि श्रद्धादिकारणोत्कृष्टत्वादित्रैविध्याभिप्रायेण भूयस्त्वाभिप्रायेण वा । गौतमेन तु विद्याया वयोजघन्यत्वेनाभिधानं पाठमात्राभिप्रायम् । तेनैव "श्रुतं तु सर्वेभ्यो गरीय" इत्युक्तत्वात् । वयोऽत्र दशम्यवस्था । मनुवसिष्ठयोश्च वयोमात्रम् ।

वसिष्ठः,

स्थविरबालातुरभारिकस्त्रीचक्रवतां पन्थाः समागमे परस्मै परस्मै देयः । राजस्नातकयोः समागमे राज्ञा स्नातकाय देयः । सर्वैरेव वध्वा उह्यमानायाः । भारिको भारवाहः । चक्रवान् शकटादिः । उह्यमानायाः विवाहकाले । पन्था देय इत्यनुवृत्तौ

मार्कण्डेयपुराणे,

मूकान्धबधिराणां च मत्तस्योन्मत्तकस्य च ।
पुंश्चल्याः कृतवैरस्य बालस्य पतितस्य च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्तो मद्यादिना। उन्मत्तक उन्मादवान्। पुंश्चली अभिसारिणी। पन्था देय इत्यनुवृत्तौ

शङ्खलिखितौ,

बालवृद्धमत्तोन्मत्तोपहतदेहभारातिक्रान्तेभ्यः स्त्रियै गार्भिण्यै स्नातकप्रव्रजितविद्याशिल्पगुणप्रकृष्टेभ्यः।

उपहतदेहः पापरोगादिना। गुणोऽत्र वित्तादिः।

देवलबौधायनौ,

पन्था देयो ब्राह्मणाय गवे राज्ञेऽपचक्षुषे।

वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च॥

अपचक्षुषे अन्धाय।

आपस्तम्बः,

राज्ञः पन्था ब्राह्मणेनासमेत्य तु ब्राह्मणस्यैव पन्थाः यानस्य भाराभिनिहितस्यातुरस्य स्त्रियाः सर्वैर्दातव्यो वर्णज्यायसे चेतर्वर्णैराशिष्टयतिमत्तोन्मत्तानात्मनः स्वस्त्ययनार्थेन सर्वैरेव दातव्यः।

गौतमः,

चक्रिदशमीस्थानुग्राह्यवधूस्नातकराजभ्यः पथो दानं राज्ञा तु श्रोत्रियाय। अनुग्राह्यो रोगार्त्त इति हरदत्तः। स्नातको विद्याव्रतोभयस्नात इत्यपि स एव।

याज्ञवल्क्यः,

वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्।

पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः॥

वृद्धो दशमीस्थः। वरो विवाहयात्रार्थमुपस्थितः।

मनुः,

चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।

स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ ।
राजस्नातकयोश्चैव स्नातको नृपमानभाक् ॥

अथाचार्यादिलक्षणम् ।

तत्र मनुः,

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥
निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥
अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥

कल्पः प्रत्यक्षवेदमूलकोऽनुष्ठानप्रतिपादको ग्रन्थविशेषः । कल्पग्रहणमङ्गान्तरोपलक्षणार्थम् । रहस्यमुपनिषदः । प्रधानत्वात्पृथगभिधानम्। एकदेशं मन्त्रं ब्राह्मणं वा। वृत्त्यर्थमात्मजीवनार्थम्। निषेको गर्भाधानं, तदादीनि वेददानपर्यन्तानि संस्कारकर्माणि। सम्भावयति संवर्धयति । निषेकमात्रकर्तृत्वादेव गुरुत्वम् , अपरलक्षणयोगस्तु आचार्यापेक्षया मान्यत्वद्योतनार्थ इति शूलपाणिः। अग्न्याधेयमग्न्याधानम् । पाकयज्ञा अष्टकादयः ।

तथा,

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥

याज्ञवल्क्यः,

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय ददद्वेदमाचार्यः स उदाहृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकदेशमुपाध्याय ऋत्विक् यज्ञकृदुच्यते ।
एतानि वचनानि मनुसमानार्थतया व्याख्येयानि ।

यमः,

सत्यवाग्धृतिमान् दक्षः सर्वभूतदयापरः ।
आस्तिको वेदनिरतः शुचिराचार्य उच्यते ॥
वेदाध्ययनसम्पन्नो वृत्तवान् विजितेन्द्रियः ।
इत्येतैर्लक्षणैर्युक्तो गुरुर्भवति नित्यशः ॥
आचार्यः आचार्यवत्पूज्य इत्यर्थः । गुरुः गुरुवत्पूज्य इत्यर्थः।

मनुः,

उपाध्यायान् दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥

कल्पतरौ भविष्यपुराणे,

उपाध्यायान् दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥
कृत्वोपाध्यायमादौ तु ये पूज्याः कथितास्तव ।
महागुरुर्महाबाहो सर्वेषामधिकः स्मृतः ॥
अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णं च पञ्चमं वेदं यन्महाभारतं स्मृतम् ।
सौराश्च धर्मा राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ।
एवं विप्रकदम्बस्य वाचकः प्रवरः स्मृतः ॥
चतुर्णामपि वर्णानां स महागुरुरुच्यते ।
यस्त्वेतानि समस्तानि पुराणानीह जानते ॥
भारतं च महाबाहो सर्वज्ञोऽसौ मतो नृणाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मात्स पूज्यो राजेन्द्र वर्णैर्विप्रादिभिः सदा ॥
किं त्वया न श्रुतं वाक्यं यथाऽऽह भगवान् विभुः ।
अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ॥
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ।

दशोपाध्यायानपेक्ष्य आचार्यः, आचार्यशतमपेक्ष्य पिता, पितृसहस्रमपेक्ष्य माता गौरवेणातिरिच्यते । अत्रोपनयनपूर्वक-सावित्रीमात्राध्यापयिता आचार्योऽभिप्रेतः । उपनयनपूर्वकसम-स्तवेदाध्यापकस्य तु उत्पादकेत्यादिवक्ष्यमाणमनुवाक्येन पित्र-पेक्षया उत्कर्षाभिधानात् । कृत्वेत्यादि । उपाध्यायादयो ये पूज्याः कथिताः तदपेक्षया ऽष्टादशपुराणानीत्यादिना वक्ष्यमाणो यो महागुरुः स पूज्यतम इत्यर्थः । कार्ष्णं कृष्णद्वैपायनप्रणीतम् ।

गौतमः, आचार्यः श्रेष्ठो गुरूणां मातेत्येके ।

शङ्खलिखितौ, न मातापित्रोरन्तरङ्गच्छेत्पुत्रः, कामं मातु-रेवानुब्रूयात्साहि धारिणी पोषणी च, न पुत्रः प्रतिमुच्येतान्यत्र सौत्रामणीयागाज्जीवन्नृणान्मातुः। मातापित्रोर्विवादे सति नान्तरं गच्छेदौदासीन्यं कुर्यादित्यर्थः। कामं यदीच्छेदित्यर्थः। अनुब्रूया-दनुकूलं वदेत् । अत्र हेतुमाह सा हीत्यादि। मातापित्रधिकारे

नारदः,
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥

अत्र पितुः श्रेयस्त्वमभिवादनमात्रे । निषेकादिसमस्तसं-स्कारपूर्वकाध्यापकपितृविषयमिति माधवः ।

मनुः,
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामान्माता पिता चैनं यदुत्पादयतो मिथः ।
सम्भूतिं तस्य तां विद्याद्यद्योनावभिजायते ॥
आचार्यस्तस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा सत्या साऽजरामरा ॥
ब्राह्मस्य जन्मनः कर्त्ता स्वधर्मस्य च शासिता ।
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥
अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः ।
पुत्रका इतिहोवाच ज्ञानेन परिगृह्य तान् ॥
ते तमर्थमपृच्छन्त देवानागतमन्यवः ।
देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥

माधवीये पुराणम्,

ज्येष्ठो भ्राता गुरुसमो मृते पितरि भूसुराः ।
कनिष्ठास्तं नमस्येरन्सर्वे छन्दोऽनुवर्त्तिनः ॥
तमेव चोपजीवेरन् यथैव पितरं तथा । इति ।

मनुः,

पितृवत्पालयेत्पुत्रान् ज्येष्ठो भ्राता यवीयसः ।
पुत्रवच्चापि वर्त्तेरन् यथैव पितरं तथा ॥

इति अभिवादनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथभैक्षचर्याविधिः ।

तत्र मनुः,

प्रतिगृह्येप्सितं दण्डमभिवाद्य च भास्करम् ।

प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥ इति ।

ईप्सितं तत्तद्वर्णविहितम् । भास्करं सौरैर्मन्त्रैरुपस्थाय सम्मुखमवस्थायेति कल्पतरुः। अग्निं प्रदक्षिणीकृत्य। एतन्त्रितयं भिक्षाचरणाङ्गतया विधीयते । यथाविधि वक्ष्यमाणभवत्पूर्वत्वादिप्रकारेण । भैक्षं भिक्षासमूहः । तत्र वाक्यप्रयोगमाह

याज्ञवल्क्यः,

आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।

ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम् ॥ इति ।

गौतमोऽपि,

आदिमध्यावसानेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्व्येणेति ।

मनुरपि,

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।

भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥ इति ।

अत्रैवं प्रयोगः । भवति भिक्षां देहीति विप्रः, भिक्षां भवति देहीति राजन्यः, भिक्षां देहि भवतीति वैश्यः । ब्रह्मचारिभिः भैक्ष्यं कुतो ग्राह्यमित्याह

याज्ञवल्क्यः,

ब्राह्मणेषु चरेत् भैक्षमनिन्द्येष्वात्मवृत्तये । इति ।

तेष्वपि विशेषमाह

मनुः,

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।

ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः प्रयतोऽन्वहम् ॥

ब्राह्मणेष्विति सति सम्भवे नियमार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असम्भवे त्वाह व्यासः,

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्ष्यमन्वहम् ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव च ॥ इति ।

सर्वशब्दोऽत्र त्रैवर्णिकपरः । सर्वत्वमाधिकारिकमिति न्यायात् । तत्रापि पतितादिवर्जं सार्ववर्णिकं भैक्ष्यचरणम् । अभिशस्तपतितवर्जमिति गौतमस्मरणात् । विशेषान्तरमाह

भविष्यपुराणम्,

सर्वं वा विचरेत् ग्रामं पूर्वोक्तानामसंभवे ।
अन्त्यवर्जं महाबाहुरित्याह भगवान् विभुः ॥

अन्त्यः शूद्रः । यत्तु मनुनोक्तम्,

सर्वं वा विचरेद् ग्रामं पूर्वोक्तानामसंभवे ।
नियम्य प्रयतां वाचमभिशस्तांस्तु वर्जयेत् ॥

इति । तदपि पूर्वोक्तेन समानविषयं, न पुनः शूद्रप्राप्त्यर्थम् । वेदैर्यज्ञैरहीनानामिति तेनैवाभिधानात् ।

यदपि भविष्यपुराणेऽभिहितम्,

चातुर्वर्ण्यं चरेद्भैक्षमलाभे कुरुनन्दन । इति ।

तदप्यापदि पूर्वपूर्वासंभवे ज्ञेयम् ।

क्षत्रवैश्यगृहेष्वेव क्रियावर्त्तिषु साधुषु ।
चातुर्वर्ण्यं चरेद्भैक्ष्यमापत्काल उपस्थिते ॥

इति विष्णुस्मरणात् । यद्यपि चातुर्वर्ण्यं चरेद्भैक्ष्यमित्युक्तं, तथापि शूद्रस्य आमान्नमेव ग्राह्यं न पक्वम् ।

तथा चाङ्गिराः,

आममेवाददीतास्मादवृत्तावेकरात्रकम् ।
आमं पूयति संस्कारो धर्म्यं तेभ्यः प्रतीच्छताम् ॥
तस्मादामं ग्रहीतव्यं शूद्रादप्यङ्गिरोऽब्रवीत् । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवृत्तौ वृत्त्यन्तराभावे। एकरात्रम् एकाहपर्याप्तम् तेभ्यः शूद्रेभ्यः धर्म्यं पूर्वोक्तम् आमं प्रतीच्छतां गृह्णतां संस्कारो ब्रह्मचर्यं पूर्यति पूर्णं भवति अन्यथा नश्यतीत्यर्थः। यद्यपि

यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ।

इति पराशरेण ब्रह्मचारिणः पक्वान्नग्रहणाधिकार एवोक्तो न आमान्नग्रहणाधिकारः, तथापि

कन्दुपक्वं स्नेहपक्वं पायसं दधिसक्तवः।

एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत्॥

इत्यादिवाक्यप्रतिप्रसूतेष्वन्यतमद् ग्राह्यम्। एषामप्यभावे मुद्गचणकाद्याममेव सद्योभक्षणार्हं ग्राह्यम्। एतेषु क्वचिदपवादमाह

मनुः,

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।

गुरुकुले गुरुगृहे। कुलं शिष्यसमूह इत्यन्ये। यदपि

मनुभविष्यपुराणयोः,

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।

भिक्षेत भिक्षां प्रथमां या चैनं नावमानयेत्॥

इति तदपि प्रथमभिक्षाविषयम्।

तथोपादानात्। अन्यत्रालाभे तत्रापि कार्यमित्याह

गौतमः, आचार्यज्ञातिगुरुगृहेषु स्वेष्वलाभेऽन्यत्रेति। स्वेषु बन्धुषु। अत्रापि उत्तरोत्तरलाभे पूर्वपूर्वं त्याज्यम्। तेषां पूर्वं पूर्वं परिहरेदिति तस्यैव स्मरणात्। भिक्षाचरणकालमाह

आपस्तम्बः, सायंप्रातरमत्रेण भिक्षाचर्यं चरेदिति। सायं सूर्यास्तानन्तरं, प्रातः षोढाविभक्तादिवसाद्यभागे। अयं च कालोऽष्टवर्षन्यूनब्रह्मचारिविषयः।

अश्नीयादष्टवर्षस्तु ब्रह्मचारी प्रगे सदा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदूर्ध्वमाद्वादशाब्दादश्नीयात्संगवे सदा ॥
तदूर्ध्वं गृहिवद्भिक्षां भोजनं च समाचरेत् ।

इति सुमन्तुस्मरणात् । तदूर्ध्वमित्युपकुर्वाणकविषयम् । नैष्ठिकस्य तु यतिवद्वानिवद्वा भोजनकालः ।

तथाच कार्ष्णाजिनिः,

मध्याह्ने गृहिणां भुक्तिर्वनिनामपराह्णके ।
सायाह्ने यतिनां प्रोक्ता प्रातस्तु ब्रह्मचारिणाम् ॥
नैष्ठिकानां तु सायाह्नेऽपराह्णे वापि सा सकृत् । इति ।

अनेन स्मृत्यन्तरस्थोऽपि प्रातःशब्दो व्याख्यातः । यत्तु प्रातःशब्दोऽत्र मध्याह्नपर इति कुसंप्रदायिनां व्याख्यानं, तत्प्रधानविपत्तिरूपन्यायविरोधादुक्तवचनाविरोधाच्चोपेक्ष्यम् । अमत्रं कांस्यव्यातिरिक्तं ताम्रादिपात्रम् ।

ताम्बूलं व्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

इति प्रचेतःस्मरणात् । पात्रान्तराणि व्यतिरेकमुखेनाह

अत्रिः,

करे कर्पटके चैव शिलायां ताम्रभाजने ।
वटार्काश्वत्थपत्रेषु गृही भुक्त्वैन्दवं चरेत् ॥

इति गृहिणो निषेधादन्येषामभ्यनुज्ञायते ।

हारीतोऽपि. लौहे मृन्मये वा पात्रे भुञ्जीतेति । तत्प्रक्षालनमाह, आपस्तम्बः, भुक्त्वा स्वयममत्रं प्रक्षालयेदिति । भिक्षेति नियमान्नैकस्यान्नमश्नीयादित्याह

मनुः,

भैक्षेण वर्त्तयेन्नित्यं नैकान्नाशी भवेद्व्रती । इति ।

इदमप्यनापदि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

92:4482K20,1
M 7 8
1904

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३२५८

AUTHOR मिश्र मित्र

TITLE वीरमित्रोदय

Q2;4Y8ञK20,1
MIS
1904

३२५८

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu